भद्रकाल्यै०। ॐ कपालिन्यै०। ॐ दुर्गायै०। ॐ क्षमायै०। ॐ शिवायै०। ॐ धात्र्यै०। ॐ स्वाहायै०। ॐ स्वधायै नमः। पुनः पूर्वादिक्रमेण—ॐ इन्द्राय नमः। ॐ अग्नये०। ॐ यमाय०। ॐ निर्ऋतये०। ॐ वरुणाय०। ॐ सोमाय०। ॐ ईशानाय नमः॥ पूर्वेशानयोर्मध्ये—ॐ ब्रह्मणे नमः। निर्ऋतिवरुणयोर्मध्ये—ॐ अनन्ताय नमः। पुनः अष्टदलमध्ये—ॐ वज्राय नमः। आग्नेये—ॐ शक्त्यै नमः। दक्षिणे—ॐ दण्डाय नमः। नैर्ऋत्ये—ॐ खड्गाय नमः। पश्चिमे—ॐ पाशाय नमः। वायव्ये—ॐ अंकुशाय नमः। उत्तरे—ॐ गदायै नमः। ईशाने—ॐ त्रिशूलाय नमः॥ पूर्वेशानयोर्मध्ये—ॐ पद्माय नमः। निर्ऋतिवरुणयोर्मध्ये—ॐ चक्राय नमः॥ ततः सप्तमातृका पूजयेत्—ॐ ब्राह्म्यै नमः। ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वैष्णव्यै नमः। ॐ वाराह्यै नमः। ॐ इन्द्राण्यै नमः। ॐ चामुण्डायै नमः॥ अष्टदलमध्ये सुवर्णप्रतिमां संस्थाप्य सत्यदुर्गां पूजयेत्।

ध्यानम्—दुर्गे! दुर्गस्वरूपासि सुरतेजोमहाबले। महानन्दकरि! देवि प्रसीद परमेश्वरि॥
एह्येहि भगवत्यम्ब! शत्रुक्षय-जयप्रदे। भक्तितः पूजयामि त्वां दुर्गे देवि सुरार्चिते॥

आवाहनम्—ॐ भगवति! सत्यदुर्गे! इहागच्छेह तिष्ठेत्यावाह्य ॐ मनोजूतिर्जुषतामाज्यस्यबृहस्पति-

यँज्ञमिमन्तनोत्वरिष्टंयज्ञꣳ समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोंऽ३॥प्रतिष्ठ ॥ ॐ एतन्ते देवसवितर्यँज्ञंप्राहुर्बृहस्पतयेब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥ ॐ भूर्भुवः स्वः भगवति ! सत्यदुर्गायाः वाङ्मनश्चक्षुः श्रोत्र-जिह्वा-घ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

सुवर्णमौक्तिकं रम्यं रत्नगर्भसमन्वितम्। सर्वेषां स्तम्भनं नित्यं सत्यदुर्गा नमोऽस्तु ते ॥

आसनम्—नमस्ते सर्वतोभद्रे सुखदं भव भूतले। त्रैलोक्यविजये देवि ! सिंहासन नमोऽस्तु ते ॥

ॐ पुरुषऽएवेदꣳ सर्वंयद्भूतंयच्चभाव्यम्इति आचमनीयं समर्पयामि ॥ ॐ सत्यदुर्गायै नमः ॥

पाद्यम्—ॐ एतावानस्यमहिमातोज्यायाँश्च० एवं सर्वत्र पुरुषसूक्तेन निम्नश्लोकैश्च ॐ सत्यदुर्गायै नमः।

सुखानन्दकरीं शान्तां सर्वदेवनमस्कृताम्। सर्वभूतात्मिकां देवीं शाम्भवीं त्वां नमाम्यहम्॥ सत्य०

अर्घ्यम्—जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ! अर्घ्यं गृहाण कौमारि ! जगन्मातर्नमोऽस्तु ते॥ सत्य०

आचमनम्—विश्वेशीं विश्वजननीं चण्डिकां प्रणमाम्यहम्। सर्वदेवीमयीं देवीं सर्वलोकभयापहाम् ॥ सत्य०

स्नानम्—या आपः सर्वभूतानां प्राणिनां स्थितिहेतवः। पावनं सर्वभूतानां तेन त्वां स्नापयाम्यहम् ॥ सत्य०

चूर्णम्—चूर्णं हरिद्राजनितं सौभाग्यं सुखदं प्रिये ! गृहाण त्वं मया दत्तं ससुगन्धं मनोहरम् ॥ सत्य०

घृत-दधि-मधूनि कांस्यपात्रे कृत्वा— ॐ सत्यदुर्गायै नमः ।

मधुपर्कम्—मधुपर्कं महादेवि ! ब्रह्माद्यैः परिकल्पितम् । मया निवेदितं भक्त्या गृहाण परमेश्वरि ॥ सत्य०

पञ्चामृतम्—पञ्चामृतं मयाऽऽनीतं पयो दधि घृतं मधु । शर्करासहितं दुर्गे स्नानार्थं प्रतिगृह्यताम् ॥ सत्य०

गङ्गाजलम्—गङ्गा सरस्वती रेवा सिन्धु चैव च नर्मदा । एताभ्यस्त्वाहृतं तोयं स्नानार्थं प्रतिगृह्यताम् ॥ सत्य०

वस्त्रम्—बहुतन्तुसमायुक्तं पट्सूत्रादिविनिर्मितम् । वासो देवि ! सुशुक्लञ्च गृहाण वरवर्णिनि ॥ सत्य०

अलङ्करणादिकम्-दिव्यरत्नसमायुक्ता वह्निभानुसमप्रभाः । गात्राणि शोभयिष्यन्ति अलङ्काराः सुरेश्वरि॥सत्य०

गन्धम्—चन्दनागुरुकर्पूरयुतं गन्धं गृहाण भो ! शरीरान्ते न जानामि चेष्टां नैव च नैव च ॥

मया निवेदितं गन्धं प्रतिगृह्य विलिप्यताम् ॥ ॐ सत्यदुर्गायै नमः ।

अक्षताः—रञ्जिताः कुंकुमेनैव अक्षताश्च सुशोभनाः । गृहाण मङ्गले देवि ! सर्वाभीष्टप्रदायिनि ॥ सत्य०

पुष्पम्—नानावृक्षसमुद्भूतं परमामोदशीतलम् । शारदीयमिदं पुष्पं गृहाण च शिवप्रिये ! ॥

मालतीचम्पकादीनि मल्लिकाकुसुमानि च । केतकी बकुलं दिव्यं गृह्यतां रुद्रवल्लभे ॥ सत्य०

सिन्दूरम्—सीमन्तशोभनं देवि ! भर्तुरायुर्विवर्धनम् । सर्वश्लाधिकाद्दिव्यं सिन्दूरं प्रतिगृह्यताम् ॥ सत्य०

पुष्पमाला—नानासुगन्धसंयुक्ता नानापुष्पविनिर्मिता। मया निवेदिता माला ग्राह्या तव महेश्वरि॥ सत्य०
दूर्वा—नमस्ते सर्वदा देवि! नमस्ते शुभ मोक्षदे! दूर्वां गृहाण देवेशि! मां निस्तारय सर्वतः॥ सत्य०
बिल्वपत्रम्—अमृतोद्भवश्रीवृक्षं महादेवप्रियं सदा। पवित्रं ते प्रयच्छामि बिल्वपत्रं सुरेश्वरि!॥ सत्य०
अङ्गपूजा—ॐ अजिताय नमः पादौ पूजयामि। ॐ ब्राह्म्यै नमः जानुनी पू०। ॐ माहेश्वर्यै नमः जङ्घे पू०। ॐ कौमाय नमः नाभिं पू०। ॐ वैष्णव्यै नमः हृदयं पू०। ॐ वाराह्यै नमः कण्ठं पू०। ॐ सत्यधारिण्यै नमः बाहू पू०। ॐ सत्यव्रतायै नमः मुखं पू०। ॐ चामुण्डायै नमः ललाटं पू०। ॐ सत्यदुर्गायै नमः सर्वाङ्गं पूजयामि॥ आग्नेये—ॐ सत्यदुर्गे हृदयाय नमः॥ नैऋत्ये—ॐ सत्यदुर्गे शिरसे स्वाहा॥ वायव्ये—ॐ सत्यदुर्गायै वौषट् नमः॥ ईशाने—ॐ भूतरक्षिणी कवचाय हुं नमः॥ दुर्गायै ॐ सत्यदुर्गे रक्षिणि नेत्रत्रयाय वौषट् नमः॥
धूपम्—वनस्पतिरसो दिव्यो गन्धाढ्योऽमरवल्लभः। मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम्॥ सत्य०
दीपम्—चक्षुर्ज्योतिर्मनश्चन्द्रो विद्युदग्निसमप्रभः। त्वमेव शरणं ज्योतिर्दीपोऽयं प्रतिगृह्यताम्॥ सत्य०
केशरनैवेद्यम्—गव्यसर्पिसमायुक्तं नानामधुरसंयुतम्। मया निवेदितं भक्त्या पायसं प्रतिगृह्यताम्॥ सत्य०

नैवेद्यानि—अन्नं चतुर्विधं देवि! रसैः षड्भिः समन्वितम्। उत्तमं प्राणदश्चैव गृहाण मम भावतः॥ सत्य०
पिष्टकनैवेद्यम्—अमृतैरर्चितं दिव्यं नानारूपविनिर्मितम्। पिष्टकं विविधं देवि गृहाण मम भावतः॥ सत्य०
मोदकनैवेद्यम्—मोदकं स्वादुसंयुक्तं शर्करादिविमिश्रितम्। सुरम्यं मधुरं भोज्यं देवि तत्प्रतिगृह्यताम्॥ सत्य०
फलानि-फलमूलानि सर्वाणि ग्राम्यारण्यानि यानि च। नानाविधसुगन्धीनि गृहाण देवि मा चिरम्॥ सत्य०
आचमनीयम्-गन्धकर्पूरसंयुक्तं कस्तूर्यादिसमन्वितम्। मया निवेदितं भक्त्या पानीयं प्रतिगृह्यताम्॥ सत्य०
ताम्बूलम्—ताम्बूलं च वरं रम्यं कर्पूरादिसुवासितम्। मया निवेदितं भक्त्या ताम्बूलं प्रतिगृह्यताम्॥ सत्य०
सुवर्णादिद्रव्यम् ॐ हिरण्यगर्भेति॥ ततः यथाशक्तिजपं कुर्यात्॥ जपं देव्यै समर्प्य नीराजनम्—

सूर्येन्दुतारकावह्नि तेजः पुञ्जविराजितम्। कर्पूरदीपं देवेशि! प्रतिगृह्ण सुरेश्वरि॥ सत्य०

प्रदक्षिणा—ज्ञाताज्ञातानि पापानि मम देहगतानि च। प्रदक्षिणाक्रमेणैव निवारय महेश्वरि॥ सत्य०
पुष्पाञ्जलिः—पथि देवालये दुर्गे अरण्ये प्रान्तरे जले। सर्वत्रोपगते दुर्गे! नारायणि नमोऽस्तु ते॥

शिरो मे सर्वदा पातु पातु कण्ठं महेश्वरि। हृदयं पातु चामुण्डा सर्वतः पातु कालिका॥
देवद्वारे नदीतीरे राजद्वारे च सङ्कटे। पर्वतारोहणे दुर्गे दुर्गे! रक्ष नमोऽस्तु ते॥

संग्रामे विजयं देहि वरं देहि च सर्वदा। पुत्रान् देहि महामाये! दारान् दारिद्र्यनाशिनि ॥
अन्धकुष्ठं च दारिद्र्यं रोगं शोकं च दारुणम्। बन्धुः स्वजनवैराग्यं तत्सर्वं हर चण्डिके ॥
रूपं देहि यशो देहि भाग्यं भवति देहि मे। पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे ॥
जयन्ती मङ्गला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

नमस्कारः-नमोऽस्तु ते महादेवि! तथा महिषमर्दिनि! नमस्तुभ्यं जगद्धात्रि! भक्तानां हितकारिणि ॥

दक्षिणादानम्—ॐ अद्येह ममेहजन्मनि सत्यदुर्गाप्रीतिद्वारा सर्वपापक्षयपूर्वकं अर्थ-धर्म-काम-मोक्षादि फलप्राप्तये आदौ उपोषणपूर्वकदीप-कलश-गणेशपूजनपूर्वकश्रीसत्यदुर्गापूजनकर्मणः सांगता-सिद्ध्यर्थमिमां दक्षिणां ताम्रं श्रीसूर्यदैवतं यथानामगोत्रायेत्यादि० ।

विसर्जनम्—आवाहनं न जानामी न जानामि विसर्जनम्। पूजां चैव न जानामि प्रसीद परमेश्वरि ॥
सत्यदुर्गे! सत्यवति! सत्यनारायणेष्टदे! सत्यव्रते सत्यफले! सत्ये! सत्यार्थदे! नमः ॥
सुवासिनीः कुमारीश्च यथाभक्त्या प्रपूजये। तव प्रसादान् मे भूयाद्वाञ्छितं वाञ्छितार्थदे ॥ इति।

*

श्रीस्वस्थानी-पूजाविधिः

सा च कर्मणो यस्य यः कालस्तत्कालव्यापिनि तिथिरिति विष्णुधर्मोक्तेर्मध्याह्नव्यापिनी ग्राह्या ॥ पूर्वाभिमुखो भूत्वाऽऽचम्य दीपं प्रज्वाल्य सङ्कल्पः—ॐ अद्येहामुकगोत्रामुकनाम्नी अहं मम कायिक-वाचिक-मानसिक-पातकदूरीकरणशत्रु-चौर-सिंह-सर्पादिभयनिवारणब्रह्मराक्षस-वेताल-कूष्माण्डभूत-प्रेत-क्षेत्रपाल-शाकिन्यादि-कीलन-मृत्युसन्निपात-राजयक्ष्म विषमज्वर-ज्वरातिसार - आदित्यादिदुर्ग्रह-दुर्योगिनी-दुःस्वप्नादि-पीडानिवृत्तिपुत्रमित्र-भृत्यगजाश्व-क्षेत्र-धन-धान्य-रत्नादिसम्पद्भोगानन्तर-गन्धर्वाप्सरोगण-संगीतादिजातमञ्जरीमालादिशोभित-विमानारोहणपूर्वकं भगवतः श्रीमद्ज्योतिर्लिङ्गस्वरूपिणः सदाशिवस्य परमसायुज्यमुक्तिकामा श्रीस्वस्थानीदेवताप्रीतये एभिर्यथा-मिलितोपचारैस्तत्व्रताङ्गभूतदेवतायाश्च पूजनमहं करिष्ये ॥ वामे अर्घ्यस्थापनम्। दक्षिणे शंख-स्थापनं च। श्रीसूर्याय अद्य स्वस्थानीव्रतं कर्तुं तदंगत्वेन जगत्साक्षिणे श्रीसूर्याय एषोऽर्घः समर्पयामि ॥ दीप-कलश-गणेशं सम्पूज्य ॥

कलशे देवद्वारपूजा—ॐ गणपतये नमः। ॐ गुरुभ्यो नमः। ॐ क्षेत्रपालाय नमः। ॐ नन्दिने नमः। ॐ महाकालाय नमः। ॐ शृंगिणे नमः। ॐ विनायकाय नमः। ॐ स्कन्दाय नमः। ॐ चण्डाय नमः। ॐ देव्यै नमः॥ पाद्यादीनि समर्पयेत्॥ ततः कुन्दशाखादिभिः कलशमुखमाच्छाद्य पूजयेत्, इति शिष्टाः—ॐ ब्रह्मणे नमः। ॐ विष्णवे०। ॐ महेश्वराय०। ॐ गङ्गायै०। ॐ सरस्वत्यै०। ॐ गण्डक्यै०। ॐ जाह्नव्यै०। ॐ नर्मदायै०। ॐ सप्तसागरेभ्यो०। ॐ मार्कण्डेयादि सप्तर्षिभ्यो०। ॐ आदित्यादिनवग्रहेभ्यो०। ॐ अश्वत्थामाद्यष्टचिरञ्जीविभ्यो०। ॐ अश्विन्यादि नक्षत्रेभ्यो०। ॐ विष्कुम्भादिसप्तविंशतियोगेभ्यो०। ॐ मेषादिद्वादशराशिभ्यो०। ॐ सम्पूर्ण कलशाय नमः॥ पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पं समर्पयेत्॥

गणेशपूजा—ॐ गणपतये नमः। विश्वेश्वराय०। एकदन्ताय०। मूषकवाहनाय०। लम्बोदराय०। गजवक्त्राय०। पृथुहस्ताय०। सिद्धिविनायकाय०। पार्वतीनन्दनाय०। मनोरथदायिने नमः॥

गोग्रासपूजा—ॐ नन्दनाय नमः। सुभद्रायै०। सुमनसे०। सुशीलाय०। सुभगाय०। पञ्चगोमाभ्यो नमः। कपिलसूत्रं कपिलपुष्पम् समर्पयेत्॥

कौमारीपूजा–ॐ ब्रह्माण्यै नमः। माहेश्वर्यै०। कौमार्यै०। वैष्णव्यै०। वाराह्यै०। ऐन्द्राण्यै०। चामुण्डायै० महालक्ष्म्यै०। शक्तिहस्तायै०। मयूरासनायै०। रक्तलोचनायै०। पराशक्त्यै०। कुमारीमूर्त्यै नमः पाद्यादीनि रक्तसूत्रं रक्तपुष्पञ्च समर्पयेत्।

मोहिनीपूजा–सर्वजनमोहिन्यै नमः। जगन्मोहिन्यै०। सर्वमोहिन्यै नमः। पाद्यादीनि पीतसूत्रं पीतपुष्पं सम०

अष्टचिरञ्जीवी पूजा—ॐ अश्वत्थाम्ने नमः। हनुमते०। विभीषणाय०। कृपाचार्याय०। परशुरामाय०। मार्कण्डेयाय०। व्यासाय०। प्रह्लादाय नमः॥ पाद्यादीनि श्वेतपुष्पञ्च समर्पयेत्॥

पञ्चबलिपूजा—जलार्द्रचिपिटान्नेन पञ्चबलिं निर्माय सिन्दूरमस्तकं कृत्वा अर्चयेदिति शिष्टाः—ॐ गणपतये नमः। बटुकाय०। योगिनीभ्यो०। क्षेत्रपालाय०। एतत्स्थानाधिपतये०। असिताङ्गाद्यष्ट-भैरवेभ्यो०। वृकोदरक्षेत्रपालाय०। रक्तकेशक्षेत्रपालाय०। लम्बोदरक्षेत्रपालाय०। सर्वपिशाचेभ्यो० सर्वभूतेभ्यो नमः॥ प्रागादीनि कृष्णसूत्रं कृष्णपुष्पञ्च समर्पयेत्॥

सूर्यादिपूजा—ॐ सूर्याय नमः। सदाशिवाय०। गृहलक्ष्म्यै०। इष्टदेवतायै०। नागेभ्यो नमः। पाद्यादीनि पञ्चवर्णसूत्रं पञ्चवर्णपुष्पञ्च सम०॥ देवाग्रे सनकादिपूजा–ॐ सनकादिऋषिभ्यो नमः। ऋषिपुत्रेभ्यो

नमः। दिव्याश्रमेभ्यो नमः॥ पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पञ्च सम०॥ देवाग्रे गोमयोद्भवब्राह्मणी-वृद्धब्राह्मणपूजा—ॐ दिव्यरूपायै नमः। दिव्याम्बरायै०। देवभक्तिन्यै०। सुभूषायै०। जटिलायै० वधिरायै०। अतिवृद्धायै०। कुब्जायै०। अतिदीर्घायै नमः॥ पाद्यादीनि श्वेतसूत्रं श्वेतपुष्पञ्च सम०। पुनस्तत्रैव नवराजपूजा—ॐ नवराजाय नमः। मातृवत्सलाय०। सुजनप्रियाय०। सुचरित्राय०। सुमतये०। प्रियंवदाय नमः॥ पाद्यादीनि श्वेतपुष्पञ्च सम०॥ पापिनीपूजा कृतदोलारोहणां पापिनीं कुण्डे निमग्नां पूजयेदिति शिष्टाचारः—ॐ नवराजपत्न्यै नमः। पापमूर्त्यै०। कुशीलायै०। कुभाषिण्यै० धर्मद्वेषिण्यै नमः॥ पाद्यादीनि कृष्णपुष्पञ्च सम०॥ देवाग्रे अप्सरसः पूजा—ॐ उर्वश्यै नमः। मेनकायै०। रम्भायै०। चन्द्ररेखायै०। तिलोत्तमायै०। वपुष्मत्यै०। कान्तिमत्यै०। लीलावत्यै०। उत्पलवत्यै०। घृताच्यै०। चन्द्रवदनायै०। धर्मवत्यै०। चकोराक्ष्यै नमः॥ पाद्यादीनि पीतसूत्रं पीतपुष्पञ्च सम०॥ भारवाहपूजा—ॐ धर्मशीलाय नमः। धर्मकर्मणे०। धर्मपतये०। धर्मरताय नमः॥ श्वेतसूत्रं श्वेतपुष्पञ्च सम०॥ नाग-नदी पूजा—ॐ सप्तसमुद्रेभ्यो नमः। अष्टनागराजराजेभ्यो नमः॥ पाद्यादीनि हरितसूत्रं हरितपुष्पञ्च सम०॥ सिन्दूरभाण्डे पूजा—ॐ पार्वत्यै नमः। गौर्यै

नमः । सौभाग्यवृद्धिकर्त्र्यै नमः ॥ रक्तसूत्रं रक्तपुष्पञ्च सम० ॥ शिवपूजा–ॐ महेश्वराय नमः । सदाशिवाय नमः । श्वेतसूत्रं श्वेतपुष्पञ्च समर्पयेत् ॥

मूलदेवतापूजा, ध्यानम्—मन्दारमालाकुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥

ॐ सहस्रशीर्षेत्यावाहनम् । ॐ पुरुषऽएवेत्यासनम् । ॐ आधारशक्तये अनन्ताय नमः । स्कन्दाय० । नारायणाय० । पद्माय० । पत्रेभ्यो० । कर्णिकायै० । केशरेभ्यो० । वृषाय० । सिंहाय नमः । पत्रादीनि समर्पयेत् ॥ ॐ एतावानस्येति पाद्यम् । त्रिपादूर्ध्वेति अर्घ्यम् । ततोविराडित्याचमनम् ॥ ॐ पयः पृथिव्यां० । दधिक्राव्णो० । घृतम्मिमिक्षे० । मधुव्वाता० । अपाꣳरसमित्यादिभिः पञ्चामृतम् । ॐ आपोऽअस्मान्निति शुद्धोदकस्नानम् ॥ प्रकृति-पुरुषस्वरूपाभ्यां शक्तिशिवाभ्यामिदं मधुपर्कं समर्पयामीति मधुपर्कम् ॥ बृहस्पते इति वस्त्रम् ॥ ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतमिति रक्तसूत्रं श्वेतसूत्रं च ॥ तस्मादश्वाइति यज्ञोपवीतम् ॥ देवीर्द्वार इति सिन्दूरं । देवीर्द्वार इति ॥ ॐ नमः शिवाय चेति मन्त्राभ्यामादर्शचामरव्यजनानि । तंयज्ञमिति चन्दनम् । अक्षन्नमीत्यक्षताः । यत्पुरुषमिति पुष्पाणि ॥

पुष्पम्—मालोचितं यथापुष्पं पञ्चवर्णैः सुगन्धिभिः। विचित्रग्रथितां मालां गृहाणेमां परमेश्वरी ॥
बिल्वपत्रम्—पद्मानां तु सहस्रस्य सम्यग्दत्तस्य यत्फलम्। तत्फलं लभते पत्रं दत्वा बिल्वस्य शोभनम् ॥
धत्तूरम्—एक धत्तूरपुष्पेण यः पूजयति शङ्करम्। सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥
दूर्वा—दूर्वाङ्कुरं यस्तु शम्भोः पूजाकाले प्रयच्छति। पूजाफलं शतगुणं सदा प्राप्नोति मानवः ॥
कमलम्—नमः शम्भवाय इति नीलकमलम्। देवीर्हा रेति जातिपुष्पम्। नमः शम्भवायेति च दमनपुष्पम्।
कन्दर्पभस्मसंजातं पवित्रं दमनं शुभम्। गृह्णीतं श्रीमहेशानी भक्त्या दत्तं मया शिवौ ॥
सहस्रसूत्रम्—कार्पासनिर्मितं सूत्रं पवित्रं सुमनोहरम्। सर्वपापविनाशाय शिवेशाभ्यां नमो नमः ॥
नमस्ते देवदेवेश सुरासुरनमस्कृत! नमस्ते जगतां मातः पार्वति! वरदायिनि ॥
मन्त्रेणाष्टवारं सदूर्वाङ्कुरकुन्दपुष्पम्—ॐ पार्वतीसहिताय शङ्कराय नमः। ॐ शम्भवे गिरिजासहिताय०
ॐ महेश्वराय उमासहिताय०। ॐ महादेवाय गौरीसहिताय०। ॐ स्थाणवे विशालाक्षीसहिताय०
ॐ शिवाय श्रीमुखीसहिताय०। ॐ पशुपतये नारायणीसहिताय०। ॐ उग्राय माधवीसहिताय०
ॐ शुभसत्वाय श्रीसहिताय०। ॐ ईश्वराय मङ्गलासहिताय०। ॐ रुद्रायाम्बिकासहिताय०।

ॐ वृषध्वजाय महिषीसहिताय नमः। ॐ पार्वत्यै नमः। ॐ सर्वाण्यै०। ॐ अम्बिकायै०। ॐ सर्वभु-दमन्यै०। ॐ श्रीस्वस्थानीपरमेश्वर्यै नमः पाद्यादीनि समर्पयेत्। ब्राह्मणोस्येति धूपम्। चन्द्रमामनस इति दीपम्॥ नाभ्याऽआसीदिति नैवेद्यम्॥ पुनराचमनं ताम्बूलादिकं निवेदयेत्॥ हिरण्यगर्भेति द्रव्यम्॥ यानि कानि च पापानि जन्मान्तर कृतानि चेति प्रदक्षिणा। अग्निर्देवतेति नीराजनम्॥

कर्पूरम्—सूर्येन्दुतारकावह्नितेजः पुञ्जविराजितम्। कर्पूरदीपं देवेश! गृहाण परमेश्वर!॥

पुष्पाञ्जलिः—नमोऽस्तु ते उमादेवि स्वस्थानि परमेश्वरि! त्रैलोक्यजननि! नित्ये सत्वानां पापहारिणि॥
त्रिपुरघ्न महादेव! भक्तवत्सल! विश्वकृत्! नमस्करोमि देवेश! ब्रह्ममाधववन्दित॥

नमस्कारः—अन्यथा शरणं नास्ति युवां वै शरणं मम। तस्मात् कारुण्यभावेन रक्षतां परमेश्वरौ॥

विसर्जनम्—आवाहनं न जानामिति॥ पुनः सूर्यार्घ्यम्—श्रीस्वस्थानीव्रतस्य सम्पूर्णफलावाप्तये जगत्-साक्षिणे श्रीसूर्याय इदमर्घ्यं समर्पयामि नमः॥

दक्षिणासङ्कल्पः—अद्येह अनेकजन्मकृतपापक्षयार्थं सांवत्सरिकस्वस्थानी-व्रत-पूजासाङ्गतासिध्यर्थमिमां दक्षिणां ताम्रखण्डं श्रीसूर्यदैवतं रजतं श्रीचन्द्रदैवतं वा यथानामगोत्रायेत्यादि॥ इति पद्मपुराणोक्त०

श्रीसूर्यपूजा-व्रतविधिः

आचम्य सूर्यायार्घ्यं दद्यात् । अर्घ्यं संस्थाप्य द्वारपूजा—ऊर्ध्वोदुम्बरके विघ्नाय नमः । महालक्ष्म्यै० । सरस्वत्यै नमः । दक्षिणशाखायां पार्श्वे गङ्गायै नमः । पूर्वे माधवाय० । दक्षिणे पिङ्गलाय० । पश्चिमे दण्डाय० । उत्तरे चण्डांशवे नमः ॥ मूलेन जलाभिमन्त्रणं कुर्यात् ॥

सूर्यपूजा—आचम्य । दीपं प्रज्वाल्य । कर्मपात्रं कृत्वा । अर्घ्यं संस्थाप्य । आत्मानं पूजासामग्रीं च संप्रोक्ष्य । प्राणायामं विधाय । अक्षतान् गृहीत्वा ।

अपसर्पन्तु ये भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

विकिरेत् ॥ ऊर्ध्वोऽधस्तात् त्रयेण छोटिकाभिर्भूतानपसार्य सङ्कल्पः—ॐ अद्येत्यादि देशकालौ संकीर्त्य अमुकनाम्नी देव्यहं श्रुति-स्मृति-पुराणोक्तफलावाप्तये दीप-कलश-गणपतिपूजनपूर्वकं श्रीसूर्यपूजनस्य पञ्चोपचारेण यथामिलितोपचारेण वा पूजनमहं करिष्ये ॥

पीठपूजा—ॐ दीप्तायै नमः, सूक्ष्मायै०, जयायै, भद्रायै०, विभूत्यै०, विमलायै०, अमोघायै०, विद्युतायै०

सर्वतोमुखायै०, ब्रह्म-विष्णु-शिवात्मने०, सौरयोग-योगपीठाय नमः ॥

तत्राष्टदले॥ पूर्वे श्रीसूर्याय नमः। आग्नेये रवये नमः। दक्षिणे विवस्वते नमः। पश्चिमे वरुणाय नमः। वायव्ये मित्राय नमः। उत्तरे आदित्याय नमः। ईशाने विष्णवे नमः। मध्ये भास्कराय नमः॥

ध्यानम्—अरुणोऽरुणपङ्कजे निषण्णकमले भीतिवरौ करैर्दधानः।
अनुवाहितमण्डलस्त्रिनेत्रो रविरेषोऽवतु मां गृहीत पद्मः॥

स्वागतं ते महाभाग! स्वागतं लोकलोचन! मयाऽऽरब्धं तु यत् कर्म तस्य साक्षी भव प्रभो!

आवाहनम्—आवाहयामि देवेश पद्महस्त सुरार्चित! जपाकुसुमसंकाश पूजार्थं च शिवाय च॥

ॐकारस्य ब्रह्मर्षि परमात्मा देवता देवीगायत्र्युष्णिकछन्दांसि श्रीसूर्यावाहने विनियोगः॥

आसनम्—चराचरस्य विश्वस्य आधारस्त्वं महीपते! मया प्रकल्पितं देव आसनं प्रतिगृह्यताम्॥

पाद्यम्—मयाहृतं तु सलिलं पाद्यार्थं विमलं विभो! कृपया तरणे स्वामिन् पाद्यं मे प्रतिगृह्यताम्॥

अर्घ्यम्—रक्तचन्दन गन्धाढ्यं गन्धाक्षतयवैस्तिलैः। कुशादूर्वाफलैः पूर्णमर्घ्यं मे प्रतिगृह्यताम्॥

आचमनम्—त्वदर्थं कल्पितं देव पवित्रं स्वादु शीतलम्। तदाचमस्व देवेश द्युमणे पङ्कजासन॥

मधुपर्कम्—मधुपर्कं शुभं पुण्यं दध्याज्यमधुसाधितम् । संजुषस्व विधानेन कृपया परमेश्वर ॥
पुनराचमनम्—जलेनामृततुल्येन पुनराचमनं कुरु । जगतां शुद्धिहेतुस्त्वं त्राहि मां भवसागरात् ॥
पञ्चामृतम्—निजोदये च सर्वेषां संत्रायक दिनेदिने। गंगोदकं गृहाणेदं स्नानीयं प्रतिगृह्यताम् ॥

पुनराचमनीयं समर्पयामि श्रीसूर्याय नमः ॥ अङ्गप्रोक्षणं कृत्वा

वस्त्रम्—वस्त्रं सुरक्तं देवेश ! ददशे नूतनं शुभे। मयार्पितं सुखोदर्कं गृहाण तिमिरान्तक ॥
चन्दनम्—सुगन्धैर्घनसाराद्यैर्निर्मितं देववल्लभम् । यक्षकर्दम संज्ञेयं गृह्ण गन्धर्ववन्दित ॥

अक्षतान् समर्पयामि सूर्याय नमः । सिन्दूरादीन् समर्पयामि सूर्याय नमः ।

पुष्पाणि—करवीरजवादीनि पुष्पाणि विविधानि च । जात्यादीनि सुगन्धीनि तानि देवेश गृह्यताम् ॥
आभूषणम्—भूषणानि विचित्राणि बहुमूल्यानि भास्कर ! किरीटकुण्डलादीनि मम दीनस्य गृह्यताम् ॥
आवरणपूजा पूर्वादिक्रमेण—ॐ मित्राय नमः । विष्णवे नमः । वरुणाय नमः । सहस्रकिरणाय नमः । भानवे नमः । तपनाय नमः । इन्द्राय नमः । रवये नमः । गभस्तिने नमः । यमाय नमः । दिनकराय नमः । हिरण्यरेतसे नमः । पुनः ॐ आदित्याय नमः । प्रागादिदिक्ष्वेव रवये नमः । भानवे

नमः। भास्कराय नमः। उषाय नमः। प्रज्ञायै नमः। ब्राह्मयै नमः। माहेश्वर्यै नमः। कौमार्यै नमः। वैष्णव्यै नमः। इन्द्राण्यै नमः। चामुण्डायै नमः। महालक्ष्म्यै नमः। अरुणाय नमः। चन्द्राय नमः। भौमाय नमः। बुधाय नमः। बृहस्पतये नमः। शुक्राय नमः। शनिश्चराय नमः। राहवे नमः। केतुभ्यो नमः। इन्द्राय नमः। अग्नये नमः। यमाय नमः। निर्ऋतये नमः। वरुणाय नमः। कुबेराय नमः। ईशानाय नमः। ब्रह्मणे नमः। अनन्ताय नमः। वज्राय नमः। शक्तये नमः कालदण्डाय नमः। खड्गाय नमः। पाशाय नमः। अंकुशाय नमः। गदाय नमः। त्रिशूलाय नमः पद्माय नमः। चक्राय नमः। साङ्गाय सपरिवाराय सायुधाय नमः॥

धूपम्—वनस्पतिरसोद्भूतं गन्धाढ्यं सुमनोहरम्। उपादेयं तु देवानां धूपोऽयं प्रतिगृह्यताम्॥

दीपम्—पञ्चवर्तिसमायुक्तं सुदीप्तं घृतपूरितम्। दीपोऽयं मम दत्तस्त्वं गृहाण तिमिरान्तक!॥

नैवेद्यम्—पक्काऽपक्करसोत्कृष्टं नैवेद्यं च चतुर्विधम्। तुष्टिदं सर्वलोकानां नैवेद्यं प्रतिगृह्यताम्॥

ताम्बूलम्—प्रीतिदं शुभदं हृद्यं ह्यघघ्नं मुखमण्डलम्। दुर्लभं सर्वदेवानां ताम्बूलं प्रतिगृह्यताम्॥

द्रव्यम्—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे॥

पूगीफलं समर्पयामि श्रीसूर्याय नमः । छत्रचामरशय्यादिदानम्–

यत्किञ्चिद्वस्तु जातं ते उपनीतं प्रभाकर । छत्र-चामर-शय्यादि तत्सर्वं प्रतिगृह्यताम् ॥

नीराजनम्–चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च । त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

पुष्पाञ्जलिः–नमस्ते पूर्वरूपाय निलयायात्ममूर्तये । नमः समाधिगम्याय ब्रह्म-विष्णु-महेश्वरैः ॥

अद्वैताय तथैकस्मै मायया बहुरूपिणे । नमः समस्तदीनान्ते उद्धाराय विवस्वते ॥

अशेषव्याधिविध्वंसकारिणे करुणात्मने । जगतामादिवैद्याय वैद्यनाथाय ते नमः ॥

नमः पद्मविकाशेन प्रसृतं ब्रह्ममूर्तये । पुण्डरीकविकासेन नमस्ते विश्वचक्षुषे ॥

नमोऽस्तु प्रणवाख्याय ऋग्यजुः साममूर्तये । छन्दोवाहरथस्थाय श्रुतिघण्टावरूथिने ॥

ज्योतिः शास्त्राय सूत्राय शिक्षासारथिवाहिने । कात्यायनप्रतीताय गृह्यरश्मिभृते नमः ॥

नमो व्याकरणोद्गीतदृढकङ्कणधारिणे । निरुक्तचापिने तुभ्यं यज्ञवाणिप्रवर्षिणे ॥

नमो निदाघतोयेन सद्यः शीतरसायने । नमः कमलकोशान्तर्हर्म्यकृतजगत्त्रयः ॥

श्रीप्रदाय प्रसन्नानामार्तीनाशनहेतवे। नमः सहस्रदीनार्त उद्धाराय विवस्वते॥
भास्वते विश्वसम्पूर्तिस्थितिसंहारकारिणे। मनोवाक्कायजनितपापतापाय हारिणे॥
विश्वतश्चक्षुरूपस्त्वं त्वं देवो विश्वतोमुखः। एको देवः स जातोऽयं द्यावाभूमि विरोचयेत्॥
नमस्कारः—नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने॥
कलात्मसर्वभूतात्मन् वेदात्मन् सर्वतोमुख! यस्मादग्नीन्दुरूपस्त्वमतः पाहि प्रभाकर!॥
नमः सवित्रे जगदेकचक्षुषे त्रयीमयायाऽखिलदेवपूजिते।
दीप्तप्रकाशाय सुवर्णचक्षुषे सुघोरसंसारभयप्रणाशिने॥
सुघोरसंसारनिमग्नभूतजने प्रपन्ने सुविवेकदायिने।
कालोपमाच्छत्रुभयाद् विमोचय संत्राहि तुभ्यं प्रणतोऽस्मि देव॥
पुनरर्घ्यं दद्यात् फल-पुष्प-चन्दनाक्षत-दूर्वाभिः—
एहि सूर्य सहस्रांशो तेजोराशे जगत्पते! अनुकम्पय मां भक्त्या गृहाणार्घ्यं दिवाकर॥

प्रार्थना—नमोऽस्तु सूर्याय नमोऽस्तु भानवे नमोऽस्तु वैश्वानरजातवेदसे।
ममेदमर्घ्यं प्रतिगृह्ण देव! देवादिदेवाय नमो नमस्ते॥
नमः सहस्रकिरण! सर्वव्याधिविनाशन! गृहाणार्घ्यं मया देव! संज्ञया सहितो रवे!॥
दण्डवत्—एकचक्रो रथो यस्य दिव्यः कनकभूषितः। स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः॥
भानो भास्कर मार्तण्ड! चण्डरश्मे दिवाकर! आरोग्यमायुर्विजयं विद्यां देहि नमोऽस्तु ते॥
प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे॥
उत्तराङ्गपूजा—यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम्। इष्टकामप्रसिद्धयर्थं पुनरागमनाय च॥
गच्छ गच्छ सुरश्रेष्ठ! स्वस्थानं परमेश्वर! यत्र ब्रह्मादयो देवाः सुरा तिष्ठन्ति हर्षिताः॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षमस्व परमेश्वर!॥
अर्घ्यं उत्थाप्य—आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर॥
मन्त्रहीनं क्रियाहीनं क्षमस्व परमेश्वर! संहारमुद्रया पुष्पं गृहीत्वा उत्तरं क्षिपेत्॥
ॐ अद्येह पूर्वकृतसङ्कल्पसिद्धिरस्तु अमुकगोत्राया अमुकनाम्नीदेव्याः सपरिवाराया दीप-कलश-

गणपतिआवाहनादिदेवतापूजनकृतस्य श्रीसूर्यस्य यथामिलितोपचारेण कृतस्य पूजनसांगता-
सिद्ध्यर्थं दक्षिणां यथानामदैवताकं यथानामगोत्राय ब्राह्मणाय दातुमहं समुत्सृजे ॥

समर्पणम्–कायेन वाचा मनसेन्द्रियैर्वा बुध्यात्मना वा प्रकृतिः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पये तत् ॥ इति श्रीसूर्यपूजाविधिः समाप्ता ॥

श्रीसूर्य-प्रातःस्मरणस्तोत्रम्

प्रातः स्मरामि खलु तत्सवितुर्वरेण्यं रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादिहेतुं ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥१॥
प्रातर्नमामि तरणिं तनुवाङ्मनोभिर्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च ।
वृष्टिप्रमोचनविनिग्रहहेतुभूतं त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥२॥
प्रातर्भजामि सवितारमनन्तशक्तिं पापौघशत्रुभयरोगहरं परं च ।
तं सर्वलोककलनात्मककालमूर्तिं गोकण्ठबन्धनविमोचनमादिदेव ॥३॥
श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत् तु यः । सर्वव्याधिविनिर्मुक्तः परं सुखमवाप्नुयात् ॥४॥

श्रीसूर्याष्टकम्

ध्यानम्—ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ।
केयूरवाम् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

साम्ब उवाच—आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर। दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते ॥१॥
सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम्। श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम् ॥२॥
लोहितं रथमारूढं सर्वलोकपितामहम्। महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥३॥
त्रैगुण्यं च महाशूरं ब्रह्मा-विष्णु-महेश्वरम्। महापापहरं देवं तं सूय प्रणमाम्यहम् ॥४॥
बृंहितं तेजपुञ्जञ्च वायुराकशमेव च। प्रभुस्त्वं सर्वलोकानां तं सूर्यं प्रणमाम्यहम् ॥५॥
बन्धूकपुष्पसंकाशं हारकुण्डलभूषितम्। एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम् ॥६॥
तं सूर्यं जगकर्तारं महातेजप्रदीपनम्। महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥७॥
तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम्। महापापहरं देवं तं सूर्यं प्रणमाम्यहम् ॥८॥
सूर्याष्टकं पठेन्नित्यं ग्रहपीडाप्रणाशनम्। अपुत्रो लभते पुत्रं दरिद्रो धनवान् भवेत् ।९॥ इति ॥

श्रावणीस्नानविधिः

श्रावणपूर्णिमायां नित्यकर्म विधाय ग्रामाद्बहिः प्राच्यामुदीच्यां वा नद्यादि जलाशयं गत्वा तत्तीरे शुभ्रां यथासम्भवां वा मृदं, आर्द्रं गोमयं, भस्म, कुशान्, तिलाक्षतान्, पुष्पाणि, दूर्वाङ्कुरापामार्गादि सर्वां स्नानसामग्रीं सम्पाद्य प्राङ्मुख उदङ्मुखो वा देशकालौ सङ्कीर्त्य आचम्य प्राणानायम्य नमस्कार प्रार्थना—

श्रीमन्महागणाधिपतये नमः। श्रीगुरुभ्यो नमः। श्रीसरस्वत्यै नमः। वेदाय नमः। वेदपुरुषाय नमः। इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। ग्रामदेवताभ्यो नमः। स्थानदेवताभ्यो नमः। वास्तुदेवताभ्यो नमः। एतत्कर्मप्रधानदेवताभ्यो नमः। सर्वेभ्यो देवेभ्यो नमः। सवभ्यो ब्राह्मणेभ्यो नमः। अविघ्नमस्तु—

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः॥
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। संग्रामे संकटे चैव विघ्नस्तस्य न जायते॥

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥
वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
गणनाथं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥
स्थानं क्षेत्रं नमस्कृत्य दिननाथं निशाकरम् । धरणीगर्भसम्भूतं शशिपुत्रं बृहस्पतिम् ॥
दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं शनैश्चरम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥
शक्रादिदेवताः सर्वानृषींश्चैव तपोधनान् । गर्गं मुनिं नमस्कृत्य नारदं पर्वतं तथा ॥
वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम् । अगस्त्यं च पुलस्त्यं च दक्षमित्रं पराशरम् ॥
भरद्वाजं च माण्डव्यं याज्ञवल्क्यं च गालवम् । अन्ये विप्रास्तपोयुक्ता वेदशास्त्रविचक्षणाः ॥
तान् सर्वान् प्रणिपत्याहं शुभं कर्म समारभे ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥
अग्रतः श्रीनृसिंहश्च पृष्ठतो देवकीसुतः । रक्षतां पार्श्वयोर्देवौ भ्रातरौ रामलक्ष्मणौ ॥

कुश-यव-तिल-जलान्यादाय सङ्कल्पः—ॐ स्वस्ति श्रीमुकुन्दसच्चिदानन्दस्य ब्रह्मणोऽनिर्वाच्यमायाशक्तिविजृम्भिताविद्यायोगात् कालकर्मस्वभावाविर्भूतमहत्तत्त्वोदिताहङ्कारोद्भूतवियदादिपञ्चमहाभूतेन्द्रियदेवतानिर्मितेऽण्डकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्तिभगवतः श्रीनारायणस्य नाभिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतस्तदुद्धरणाय प्रजापतिप्रार्थितस्य समस्तजगदुत्पत्तिस्थितिलयकारणस्य जगद्रक्षाशिक्षाविचक्षणस्य प्रणतपारिजातस्य अच्युतानन्तवीर्यस्य श्रीमद्भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या ध्येयमानस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमेऽव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृते अस्मिन् महति ब्रह्माण्डखण्डे आधारशक्तिश्रीमदादि वाराहदंष्ट्राग्रविराजिते कूर्माऽनन्तवासुकितक्षककुलिककर्कोटकपद्ममहापद्मशङ्खाद्यष्टमहानागैर्ध्रियमाणे ऐरावतपुण्डरीकवामनकुमुदाञ्जनपुष्पदन्तसार्वभौमसुप्रतीकाष्टदिग्गजप्रतिष्ठितानामतलवितलसुतल-तलातल-रसातल-

महातलपाताललोकानामुपरिभागे भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकाख्यसप्तलोकानामधोभागे चक्रवालशैलमहावलयनागमध्यवर्तिनो महाकालमहाफणिराजशेषस्य सहस्रफणानां मणिमण्डलमण्डिते दिग्दन्तिशुण्डोत्तम्भिते अमरावत्यशोकवती भोगवती सिद्धवती गान्धर्ववती काञ्च्यवन्त्यलकावती यशोवतीति पुण्यपुरीप्रतिष्ठिते इन्द्राग्नियमनिर्ऋतिवरुणवायुकुबेरेशानाष्टदिक्पालप्रतिष्ठिते वरध्रुवाधरसोमपाप्रभञ्जनानलप्रत्यूषप्रभासाख्याष्टवसुभिर्विराजिते हरत्र्यम्बकरुद्रमृगव्याधापराजितकपालीभैरवशम्भुकपर्दिवृषाकपिबटुरूपाख्यैकादशरुद्रैः संशोभिते रुद्रोपेन्द्रसवितृधातृत्वष्ट्रर्यमेन्द्रेशानभगमित्रपूषाख्यद्वादशादित्यप्रकाशिते यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गनिरतवसिष्ठवालखिल्यविश्वामित्र-दक्ष-कात्यायन-कौण्डिण्य-गौतमाङ्गिरसपाराशर्यव्यासवाल्मीकशुकशौनकभरद्वाजसनकसनन्दनसनातनसनत्कुमारनारदादिमुख्यमुनिभिः पवित्रिते लोकालोकाचलवलयिते लवणेक्षुरससुरासर्पिर्दधिक्षीरोदकयुक्तसप्तार्णवपरिवृते जम्बूप्लक्षशाल्मलिकुशक्रौञ्चशाकपुष्कराख्यसप्तद्वीपयुते इन्द्रकांस्यताम्रगभस्तिनागसौम्यगन्धर्वचारणभारतेतिनवखण्डमण्डिते सुवर्णगिरिकर्णिकोपेतमहासरोरुहाकारपञ्चाशत्कोटि-

योजनविस्तीर्णभूमण्डले अयोध्या मथुरा माया काशी काञ्च्यवन्तिका द्वारावतीति सप्तपुरीप्रतिष्ठिते महामुक्तिप्रदस्थले शालग्रामशम्भलनन्दिग्रामेतिग्रामत्रयविराजिते चम्पकारण्यबदरिकारण्य-दण्डकारण्यार्बुदारण्यधर्मारण्यपद्मारण्यगुह्यारण्य-जम्बुकारण्य-विन्ध्यारण्य-द्राक्षारण्य-नहुषारण्य-काम्यकारण्यद्वैतारण्यनैमिषारण्यादीनां मध्ये सुमेरुनिषधकूटशुभ्रकूटश्रीकूट-हेमकूट-रजतकूट-चित्रकूटत्रिकूटकिष्किन्धश्वेताद्रिकूटहिमविन्ध्याचलानां हरिवर्षकिम्पुरुषवर्षयोश्च दक्षिणे नव-सहस्रयोजनविस्तीर्णे भरतखण्डे मलयाचलसह्याचलविन्ध्याचलानामुत्तरेण स्वर्णप्रस्थ-चण्डप्रस्थसूक्तिक आवन्तकरमणक महारमणक-पाञ्चजन्य-सिंहल-लङ्का-शोकवत्यलकावती-सिद्धवती-गान्धर्ववत्यादिपुण्यपुरीविराजिते नवखण्डोपद्वीपमण्डिते दक्षिणावस्थितरेणुकाद्वय-सूकर-काशी-काञ्चीकालिकाल-वटेश्वर-कालञ्जर-महाकालेतिनवोखरयुते द्वादशज्योतिर्लिङ्ग गङ्गा (भागीरथी) गोदा (गौतमी) क्षिप्रा-यमुना-सरस्वती-नर्मदा-तापी-पयोष्णी-चन्द्रभागा-कावेरी-मन्दाकिनी-प्रवराकृष्णावेण्याभीमरथीतुङ्गभद्रामलापहाकृतमालाताम्रपर्णी-विशालाक्षीवञ्जुला-चर्मण्वती-वेत्रवती-भोगावती-विशोका-कौशिकी-गण्डकी-वासिष्ठी-प्रमदाविश्वामित्रीफल्गुनीचित्रकाश्यपी-सरयू-

सर्वपापहारिणी-करतोयाप्रणीतावज्रावकगामिनीसुवर्णरेखाशोणाभवनाशिनी शीघ्रगाकुशावर्तिनी-ब्रह्मानन्दामहितनयेत्यनेकपुण्यनदीभिर्विलसिते ब्रह्मपुत्र-सिन्धुनदादि परमपवित्रजलविराजिते हिमवन्मेरुगोवर्धन-क्रौञ्च-चित्रकूट-हेमकूट-महेन्द्रमलयसह्येन्द्रकीलपारियात्राद्यनेकपर्वत-समन्विते मतङ्ग-माल्य-किष्किन्ध-ऋष्यशृङ्गेतिमहानगसमन्विते अङ्ग-बङ्ग-कलिङ्गकाश्मीरकाम्बोज-सौवीर-सौराष्ट्र-महाराष्ट्र-मगध-नेपाल-केरल-चोल-पाञ्चाल-गौड-मालव-मलय-सिंहल-द्रविड - कर्नाटक-ललाटकरहाटवरहाटपानाटपाण्ड्यनिषधमागधआन्ध्रदशार्णवभोजकुरुगान्धार-विदर्भ-विदेहवाह्ली-कबर्बरकैकेयकोसलविराटशूरसेनकोङ्कणकैकटमत्स्यमद्र-पारसिकखर्जूरयावन-म्लेच्छ-जालन्धरेति सिद्धवत्यन्यदेशविशेषभाषाभूमिपालविचित्रिते इलावृत-कुरुभद्राश्वकेतुमाल-किम्पुरुषरमणकहिरण्मयादिनववर्षाणां मध्ये भरतखण्डे बकुलचम्पकपाटलाब्जपुन्नागजातिकरवीररसालकह्लारकेतक्यादिनानाविधकुसुमस्तबकविराजिते कोकन्तहिरण्यशृङ्गकुब्जाबुंदमणिकर्णीवटशालग्रामसूकर-मथुरागयानिष्क्रमणलोहार्गलपोतस्वामिप्रभासबदरीतिचतुर्दशगुह्यविलसिते जम्बुद्वीपे कुरुक्षेत्रादिसमभूमध्यरेखायाः पूर्वदिग्भागे कुलमेरोर्दक्षिणदिग्भागे विन्ध्यस्य उत्तरे देशे श्रीशैलस्य

वायव्यदेशे कृष्णावेण्योर्मध्यदेशे मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुरामरामकृष्णबुद्धकल्कीति-दशावताराणां मध्ये बौद्धावतारे गङ्गादिसरिद्भिः पाविते एवं नवसहस्रयोजनविस्तीर्णभारतवर्ष निखिलजनपावनपरमभागवतोत्तमशौनकादिनिवासिते नैमिषारण्ये आर्यावर्तान्तर्गतब्रह्मावर्तैक-देशे सूर्यान्वयभूभृत्प्रतिष्ठिते श्रीमन्नारायणनाभिकमलोद्भूतसकलजगत्स्रष्टुः परार्धद्वयजीविनो ब्रह्मणो द्वितीये परार्धे एकपञ्चाशत्तमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते रथन्तरादिद्वात्रिंशत्कल्पानां मध्ये अष्टमे श्वेतवाराहकल्पे स्वायम्भुवादिमन्वन्तराणां मध्ये सप्तमे वैवस्वतमन्वन्तरे कृतत्रेताद्वापरकलिसंज्ञकानां चतुर्णां युगानां मध्ये वर्तमाने अष्टा-विंशतितमे कलियुगे तत्प्रथमे विभागे (पादे) श्रीमन्नृपविक्रमाकात् श्रीमन्नृपशालिवाहनाद्वा यथासंख्यागमेन चान्द्रसावनसौरनाक्षत्रादिप्रकारेणागतानां प्रभवादिषष्टिसंवत्सराणां मध्ये अमुकनाम्नि संवत्सरे उत्तरगोलावलम्बिनि श्रीमार्तण्डमण्डले अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकस्थे सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं गुणविशेषण

विशिष्टायां शुभपुण्यतिथौ अमुकगोत्रस्य अमुकप्रवरस्य अमुकशर्मणो मम इह जन्मनि जन्मान्तरे वा बाल्ययौवनवार्धक्यावस्थासु वाक्पाणिपादपायूपस्थघ्राणरसनाचक्षुः स्पर्शनश्रोत्रमनोभिश्चरितज्ञाताज्ञातकामाकाममहापातकोपपातकादिसञ्चितानां पापानां ब्रह्महनन-सुरापान-सुवर्णस्तेयगुरुतल्पगमनतत्संसर्गरूपमहापातकानां बुद्धिपूर्वकाणां मनोवाक्कायकृतानां बहुकालाभ्यस्तानां उपपातकानां च स्पृष्टास्पृष्टसङ्करीकरण-मलिनीकरणापात्रीकरण-जातिभ्रंशकरण-विहिताकरण-कर्मलोपजनितानां रसविक्रय-कन्याविक्रय-हयविक्रय-गोविक्रय-खरोष्ट्रविक्रयदासीविक्रयाजादिपशुविक्रय-स्वगृहविक्रय-नीलीविक्रयाक्रेयविक्रय-पण्यविक्रय-जलचरादिजन्तुविक्रय-स्थलचरादिविक्रयखेचरादिविक्रयसम्भूतानां निरर्थकवृक्षच्छेदनऋणानपाकरणब्रह्मस्वापहरण-देवस्वापहरणराजस्वापहरणपरद्रव्यापहरण-तैलादिद्रव्यापहरण-फलादिहरण-लोहादिहरणनानावस्तुहरणरूपाणां ब्राह्मणनिन्दा-गुरुनिन्दा-वेदनिन्दा-शास्त्रनिन्दा-परनिन्दाभक्ष्यभक्षणाभोज्यभोजनाचोष्यचोषणालेह्यलेहनापेयपानास्पृश्यस्पर्शनाश्राव्यश्रवणाहिंस्यहिंसनावन्द्यवन्दनाचिन्त्यचिन्तनायाज्ययाजनापूज्यपूजनरूपाणां मातृपितृतिरस्कारस्त्रीपुरुषप्रीतिभेदनपरस्त्रीगमनविधवा-

गमनवेश्यागमनदासीगमन-चाण्डालादिहीनजातिगमन-गुदगमन-रजस्वलागमन-पश्वादिगमनरूपाणां कूटसाक्षित्वपैशुन्यत्रादमिथ्यापवादम्लेच्छसम्भाषणब्रह्मद्वेषकरणब्रह्मवृत्तिहरणवृत्तिच्छेदनपरवृत्तिहरणरूपाणां मित्रवञ्चनगुरुवञ्चनस्वामिवञ्चनासत्यभाषणगर्भपातनपथिताम्बूलचर्वणहीनजातिसेवन-परान्नभोजन-गणान्नभोजन-लशुन-पलाण्डुगृञ्जनभक्षणतालवृक्षफलभक्षणोच्छिष्टभक्षण-मार्जारोच्छिष्टभक्षण-पर्युषितान्नभक्षणरूपाणां पंक्तिभेदकरण-भ्रूणहिंसा-पशुहिंसा-बालहिंसाद्यनेकहिंसोद्भुतानां शौचत्यागस्नानत्यागसन्ध्यात्यागोपासनाग्नित्यागवैश्वदेवत्यागरूपाणां निषिद्धाचरणकुग्रामवासब्रह्मद्रोहगुरुद्रोह-मातृपितृद्रोहपरद्रोहपरनिन्दात्मस्तुतिदुष्टप्रतिग्रहदुर्जनसंसर्गरूपाणां गोयानवृषभयानमहिषीयानगर्दभयानोष्ट्रयानाजयानभृत्याभरणस्वग्रामत्यागगोत्रत्यागकुलत्यागदूरस्थमन्त्रणविप्राशाभेदनावन्दिताशीर्वादग्रहणपतितसम्भाषणरूपाणां पतितजनपंक्तिभोजनाहःसङ्कमवृथामनोरथादिपापानां—

तथा—महापापोपपापाभ्यां नाना योनिषु यत्कृतम्। बालभावेन यत्पापं क्षुत्तृडर्थे च यत् कृतम्॥
आत्मार्थे चैव यत्पापं परार्थे चैव यत् कृतम्। तीर्थेषु चैव यत् पापं गुर्ववज्ञा कृतं च यत्॥

रागद्वेषादिजनितं कामक्रोधेन यत् कृतम् । हिंसानिद्रादिजं पापं भेददृष्ट्या च यन्मया ॥
देहाभिमानजं पापं सर्वदा यन्मया कृतम् । भूतं भव्यं च यत् पापं भविष्यं चैव गौतमि ॥
शुष्कमार्द्रं च यत् पापं जानताऽजानता कृतम् । महल्लघु च यत् पापं तन्मे नाशय जाह्नवि ॥
ब्रह्महा मद्यपः स्तेयी तथैव गुरुतल्पगः । महापापानि चत्वारि तत्संसर्गी तु पंचमः ॥
अतिपातकमन्यच्च तन्न्यूनमुपपातकम् । गोवधो व्रात्यता स्तेयं ऋणानां चानपक्रियाः ॥
अनाहिताग्निना पण्यविक्रयः परिवेदनम् । इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥
हिंसायात्राविधानं च भृतकाध्यापनं तथा । प्रथमाश्रममारभ्य यत्किञ्चित् किल्विषं कृतम् ॥
कृमिकीटादिहननं यत्किञ्चित् प्राणिहिंसनम् । मातापित्रोरशुश्रूषा यद्वुवाक्याकरणं तथा ॥
अपूज्यपूजनं चैव पूज्यानां च व्यतिक्रमः । अनाश्रमस्थताग्न्यादि देवाशुश्रूषणं तथा ॥
परकार्यापहरणं परद्रव्योपजीवनम् । ततो ज्ञानकृतं वापि कायिकं वाचिकं तथा ॥
मानसं त्रिविधं पापं प्रायश्चित्तैरनाशितम् । तस्मादशेषपापेभ्यस्त्राहि त्रैलोक्यपावनि ॥
निष्पापोऽस्म्यधुना देवि प्रसादात् तव नान्यथा ॥ इत्यादि प्रकीर्णपातकानाम् एतत्कालपर्यन्तं

सञ्चितानां लघुस्थूलसूक्ष्माणां च निःशेषपरिहारार्थं दशावरान् दशपरान् आत्मना सहितान् एकविंशति पुरुषानुद्धर्तुं ब्रह्मलोकावधिपञ्चाशत्कोटियोजनविस्तीर्णेऽस्मिन्भूमण्डले सप्तर्षिमण्डल-पर्यन्तं बालुकाभिः कृतराशेः वर्षसहस्रावसाने एकैकबालुकापकर्षक्रमेण सर्वराश्यपकर्षसंमितका-लपर्यन्तं ब्रह्मलोके ब्रह्मसायुज्यताप्राप्त्यर्थं कुरुक्षेत्रादिसर्वतीर्थेषु स्नानपूर्वकं सहस्रगोदानजन्य फलप्राप्त्यर्थं तथा मम समस्तपितॄणां आत्मनश्च विष्ण्वादिलोकप्राप्तये अधीतानां अध्येष्यमा-णानां चाध्यायानां स्थापनविच्छेदक्रोशघोषण दन्तविहृतिदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां गलोपलम्बितविहृतोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पठितानां श्रुतीनां यथातयामत्वं तत् परिहारार्थं अष्टत्रिंशदनध्यायाध्ययने रथ्यासञ्चरतः शूद्रस्य शृण्वतोऽध्ययने म्लेच्छान्त्यजादेः शृण्वतोऽध्ययने अशुचिदेशेऽध्ययने आत्मनोऽशुचित्वेऽध्ययने अक्षरस्वरानुस्वारपदच्छेदकण्डिका-व्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्धन्योष्ठ्यदन्त्यनासिकानुनासिकरेफ-जिह्वामूलीयोपध्मानीयोदा-त्तानुदात्त-स्वरितादीनां व्यत्ययेनोच्चारे माधुर्याक्षरव्यक्ति-हीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं देवब्राह्मण

सवितृसूर्यनारायणसन्निधौ गङ्गाभागीरथ्यां अमुक तीर्थे वा प्रवाहाभिमुखं स्नानमहं करिष्ये[१] ॥
ॐ उभाकवीयुवा यो नो धर्मः परापतत् । परिसख्यानि धमिसो विसख्यानि विसृजामहे ॥
स्नानानुज्ञां प्रार्थयेत्–नमोस्तु देवदेवाय शितिकंठाय वेधसे। रुद्राय चापहस्ताय दंडिने चक्रिणे नमः॥
सरस्वती च गायत्री वेदमाता गरीयसी। सन्निधात्री भव त्वं च सर्वपापप्रणाशिनी ॥
यद्वा सागरनिर्घोष दण्डहस्तासुरान्तक । तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम ॥
भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥
नमामि गंगे! तव पादपङ्कजं, सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिं च मुक्तिं च ददासि नित्यं, भावानुसारेण सदा नराणाम् ॥
उत्तिष्ठन्तु महाभूता ये भूता भूमिवासिनः । भूतानामविरोधेन स्नानकर्म समारभे ॥
अपसर्पन्तु ते भूता ये भूतास्तीर्थदूषकाः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा । आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥

१—यदि यजमानो वेदाधिकारी न स्यात् तर्हि तेनायं सङ्कल्पः पुराणोक्तविधिना कार्यः ।

अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव। वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे॥
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति याः। देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा॥
गंगे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु-कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

तीर्थाभिमन्त्रणम् न्युब्जाञ्जलिना—ॐ उरुᳪ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ॥ अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित्॥ नमो वरुणायाभिष्ठितो वरुणस्य पाशः॥१॥

जलावर्तनम्—दक्षिणहस्ताङ्गुलिभिर्दक्षिणावर्तं त्रिवारम्—ॐ येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः॥२॥

पूर्णाञ्जलिनापोग्रहणम्—ॐ सुमित्रिया नऽआपऽओषधयः सन्तु॥३॥

तीर्थतटे जलप्रक्षेपणम्—दुर्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यं च वयं द्विष्मः॥४॥

मृत्तिकालेपनम्—वामहस्तेन नाभेरधः दक्षिणहस्तेन नाभेरूर्ध्वं तूष्णीं त्रिस्त्रिरनुलिप्य—
ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्॥ समूढमस्य पाᳪ सुरे स्वाहा॥५॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे। उद्धृतासि वराहेण कृष्णेन शतबाहुना॥

मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता। त्वया हतेन पापेन गच्छामि परमां गतिम् ॥
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥

स्नायात्–नाभिमात्रं तीर्थजलं प्रविश्य सूर्याभिमुखम्—ॐ आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्वः पुनन्तु ॥ विश्वꣳ हिरिप्प्रम्प्रवहन्तिदेवीः ॥६॥

पुनः स्नानम्–ॐ उदिदाभ्यः शुचिरापूतऽएमि ॥७॥

पुनस्तूष्णीं निमज्योन्मज्याचामेत् ॥ सोदकं गोमयं सूर्याय दर्शयित्वा मृत्तिकावत् लेपनम्—

गोमयाभिमन्त्रणम्–अग्रमग्रं चरन्तीनामोषधीनां वने वने। तासां वृषभपत्नीनां पवित्रं कायशोधनम् ॥
तन्मे रोगांश्च शोकांश्च पापं मे हर गोमय ॥
ॐ मानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वपुरीरिषः ॥
मानोव्वीरान्रुद्रभामिनोव्वधीर्हविष्म्मन्तः सदमित्त्वाहवामहे ॥८॥ दक्षिणहस्तेन नाभितः ऊर्ध्वं

भस्मलेपनम्—ॐ जलमिति भस्म। स्थलमिति भस्म। व्योमेति भस्म। सर्वꣳहवाइदं भस्म।
मन एतानि चक्षूꣳषि भस्मानीति ॥ ॐ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने ॥

सꣳ सृज्ज्यमातृभिष्ट्वज्ज्योतिष्म्मान् पुनरासदः ॥ ९ ॥ स्नायात् ॥

मार्जनम्—ॐ इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १० ॥ ॐ तत्त्वायामिब्ब्रह्मणा व्वन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोद्ध्युरुशꣳ समानऽआयुः प्रमोषीः ॥ ११ ॥ ॐ त्वन्नोऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः ॥ यजिष्ठोव्वह्नितमः शोशुचानोविश्वाद्वेषाꣳसिप्प्रमुमुग्ग्ध्यस्म्मत् ॥ १२ ॥ ॐ सत्त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्व्युष्टौ ॥ अवयक्ष्वनोव्वरुणꣳ रराणोव्वीहिमृडीकꣳ सुहवोनऽएधि ॥ १३ ॥ ॐ मापोमौषधीर्हिꣳ सीर्द्धाम्म्नोधाम्म्नोराजँस्ततोव्वरुणनोमुञ्च ॥ यदाहुरग्घ्न्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च ॥ १४ ॥ ॐ उदुत्तमंव्वरुणपाशमस्म्मदवाधमंव्विमद्ध्यमꣳ श्रथाय ॥ अथाव्वयमादित्यव्रतेतवानागसोऽअदितयेस्याम ॥ १५ ॥ ॐ मुञ्चन्तुमाशपत्थ्यादथोवरुण्यादुत ॥ अथोयमस्यपड्वीशात्सर्व्वस्माद्देवकिल्बिषात् ॥ १६ ॥ ॐ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः ॥ अव देवैर्देवकृतमेनोयासिषमवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्प्पाहि ॥ १७ ॥ तूष्णीं स्नात्वाऽऽचम्य,

पुनर्दर्भैर्मार्जनम्—ॐ आपोहिष्ठामयोभुवस्तानऽऊर्ज्जेदधातन । महेरणायचक्षसे ॥ १८ ॥ ॐ योवः शिवत

मोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥१९॥ ॐ तस्माऽअरङ्गमामवोयस्यक्षयायजि
न्न्वथ ॥ आपोजनयथाचनः ॥२०॥ ॐ इदमापः प्रवहतावद्यञ्चमलञ्चयत् ॥ यच्चाभिदुद्रोहानृतं
यच्चशेपेऽअभीरुणम् ॥ आपोमातस्मादेनसः पवमानश्चमुञ्चतु ॥२१॥ ॐ हविष्मतीरिमाऽआ-
पोहविष्मौँ२॥ऽआविवासति ॥ हविष्मान्देवोऽअद्ध्वरोहविष्मौँ२॥ऽअस्तुसूर्यः ॥२२॥ ॐ देवी
रापोऽअपान्नपाद्योवऽऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः ॥ तन्देवेब्भ्योदेवत्रादत्तशुक्रपेब्भ्योये
षाम्भागस्त्थस्वाहा ॥२३॥ ॐ कार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मत
समोषधीभिरोषधीः ॥२४॥ ॐ अपो देवामधुमतीरगृब्भ्णन्नूर्जस्वतीराजस्वश्चितानाः ॥ याभि
र्म्मित्रावरुणावब्भ्यषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्यरातीः ॥२५॥ ॐ द्रुपदादिवमुमुचानः स्विन्नः
स्नातोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥२६॥ ॐ शन्नोदेवीरभिष्टयऽआपो
भवन्तुपीतये ॥ शंयोरभिस्रवन्तुनः ॥२७॥ ॐ अपा ँ रसमुद्वयस ँ सूर्येसन्त ँ समाहितम् ॥
अपा ँ रसस्ययोरसस्तंवोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टङ्गृह्णाम्म्येषतेयं निरिन्द्राय
त्वाजुष्टतमम् ॥२८॥ ॐ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्प्रजाब्भ्यः। तासामास्थानादुज्जिहता

मोषधयः सुपिप्पलाः ॥ २९ ॥ ॐ पुनन्तुमापितरः सोम्यासः पुनन्तुमापितामहाः पुनन्तुप्रपिता
महाः ॥ पवित्रेणशतायुषा ॥ ३० ॥ ॐ पुनन्तुमापितामहाः पुनन्तुप्रपितामहाः ॥ पवित्रेणशता
युषाविश्वमायुर्व्यश्नवै ॥ ३१ ॥ ॐ अग्नऽआयूꣳषिपवसऽआसुवोर्ज्जमिषञ्चनः ॥ आरेबाधस्व
दुच्छुनाम् ॥ ३२ ॥ ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः ॥ पुनन्तुविश्वाभूतानिजातवेदःपुनी
हिमा ॥ ३३ ॥ ॐ पवित्रेणपुनीहिमाशुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूँ२॥ऽरनु ॥ ३४ ॥
ॐ यत्तेपवित्रमर्चिष्यग्नेविततमन्तरा ॥ ब्रह्मतेनपुनातुमा ॥ ३५ ॥ ॐ पवमानः सोऽअद्यनः
पवित्रेणविचर्षणिः ॥ यः पोतासपुनातुमा ॥ ३६ ॥ ॐ उभाभ्यान्देवसवितः पवित्रेणसवेनच ॥
माम्पुनीहिविश्वतः ॥ ३७ ॥ ॐ वैश्वदेवीपुनतीदेव्यागाद्यस्यामिमाबह्व्यस्तन्वोवीतपृष्ठाः ॥ तया
मदन्तः सधमादेषुवयꣳ स्यामपतयोरयीणाम् ॥ ३८ ॥ सजलेन कुशत्रयेण नाभिदक्षिणपार्श्वमारभ्य
शिरो नीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं मार्जयित्वा पश्चादुदकं स्पृशेत् ।

नाभेरूर्ध्वं मार्जयेत् — ॐ चित्पतिर्म्मापुनातु देवोमासवितापुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥
तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ३९ ॥

नाभेरधो मार्जयेत्—ॐ वाक्पतिर्म्मापुनात्वच्छिद्रेणपवित्रेणसूर्यस्यरश्मिभिः ॥
तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४० ॥
सर्वाङ्गे मार्जयेत्—ॐ देवोमासविता पुनात्त्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥
तस्यतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४१ ॥
कुशैर्मार्जनम्—ॐ भूः पुनातु । ॐ भुवः पुनातु । ॐ स्वः पुनातु । ॐ महः पुनातु । ॐ जनः पुनातु ।
ॐ तपः पुनातु । ॐ सत्यं पुनातु । ॐ तत्सवितुर्व्वरेण्यं० सर्वं पुनातु ॥
अपामार्गेण मार्जनम्—ॐ अपाघमपकिल्बिषमपकृत्यामपोरपः ॥ अपामार्गत्वमस्मदपदुः ष्वप्न्यꣳ सुव ॥
दूर्वांकुरैस्त्रिभिः मार्जनम्—ॐ काण्डात्काण्डात्प्ररोहन्तीपरुषः परुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥
अघमर्षणम्—वक्ष्यमाणषट्पक्षाणामन्यतमेनान्तर्जले मग्नोऽनुच्छ्वसन्नघमर्षणं कुर्यात्—
ॐ द्रुपदादिवमुमुचानः स्विन्नः स्नातोमलादिव ॥ पूतम्पवित्रेणेवाज्यमापः शुन्धन्तुमैनसः ॥ ४३ ॥ वा
ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरंपुरः ॥ पितरञ्चप्रयन्त्स्वः ॥ ४४ ॥ त्रिः । सशिरसं प्राणायामं
वा त्रिः—ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुः० स्वरोम् ।

इति वा त्रिः पठेत् । यद्वा परमात्मानं विष्णुं शेषशायिनं सायुधं सश्रीकमेकाग्रमनसा ध्यायेत् ॥ एवं स्नानं कृतं स्यात् ॥[१]

स्नानाङ्गतर्पणम्—पूर्वाभिमुखः सन् कुशत्रयं गृहीत्वा तदग्रैः सव्येन देवतीर्थेन देवेभ्यः एकैकमञ्जलिं दद्यात्—ॐ ब्रह्मादयो देवास्तृप्यन्ताम् । ॐ भूर्देवास्तृप्यन्ताम् । ॐ भुवर्देवास्तृप्यन्ताम् । ॐ स्वर्देवास्तृप्यन्ताम् । ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम् ॥

उदगग्रान् कुशान् धृत्वा तदग्रैर्निवीत्या प्रजापतितीर्थेन, ऋषिभ्यो द्वौ द्वावञ्जली—ॐ सनकादिद्वैपायनादयः ऋषयस्तृप्यन्ताम् । ॐ भूर्ऋषयस्तृ० । ॐ भुवर्ऋषयस्तृ० । ॐ स्वर्ऋषयस्तृ० । ॐ भूर्भुवः स्वर्ऋषयस्तृप्यन्ताम् । ततः पितृतर्पणे भुग्नान्दक्षिणाग्रमूलान् दर्भान् धृत्वाऽपसव्येन पितृतीर्थेनोङ्कारपूर्वकं पितृभ्यस्त्रींस्त्रीन्नञ्जलीन् दद्यात्—ॐ कव्यवाडनलादयः पितरस्तृप्यन्ताम् । ॐ भूः पितरस्तृ० ॐ भुवः पितरस्तृ० । ॐ स्वः पितरस्तृ० । ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम् ॥ सव्येन आचम्य

१—शीतप्रदेशे धौतवाससी परिधाय ।

यक्ष्मतर्पणम्—यन्मया दूषितं तोयं शरीरमलसम्भवात्। तस्य पापस्य शुद्ध्यर्थं यक्ष्मै तत्ते तिलोदकम् ॥

तीर्थतटे तिलमिश्रं जलाञ्जलिं निक्षिपेत् ॥ लतादिकेषु स्वदक्षिणभागे—

शिखोदकत्यागः—लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः। ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ॥

दर्भासने प्राङ्मुख उदङ्मुखो वा उपविश्य भस्म गोपीचन्दनादि धृत्वा पवित्रपाणिः आचम्य ।

सूर्यार्घ्यम्—ॐ उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्यम् ॥

सूर्योपस्थानम्—ॐ उद्वयन्तमसस्परिस्वः पश्यन्तऽउत्तरम् । देवन्देवत्रासुर्यमगन्मज्योतिरुत्तमम् ॥१॥
उदुत्त्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्यम् ॥ २ ॥ ॐ चित्रन्देवानामुदगादनीकञ्च-
क्षुर्म्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीऽअन्तरिक्षꣳ सूर्यऽआत्मजगतस्तस्थुषश्च ॥ ३ ॥
ॐ तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेमशरदः शतꣳ शृणुयामश-
रदः शतम्प्रब्रवामशरदः शतमदीनाः स्यामशरदः शतम्भूयश्चशरदः शतात् ॥ ४ ॥

प्रदक्षिणा-नमस्कारः—ॐ नमः सवित्रे जगदेकचक्षुषे, जगत्प्रसूतिस्थितिनाशहेतवे ॥
त्रयीमयाय त्रिगुणात्मधारिणे विरञ्चिनारायणशङ्करात्मने ॥१॥

ब्रह्मयज्ञप्रयोगः—आचम्य प्राणानायम्य पवित्रपाणिर्भूत्वा सङ्कल्पः—ॐ अद्य पूर्वोच्चारित एवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ ममाऽत्मनः श्रुति-स्मृति-पुराणोक्तफलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं यथाशक्ति ब्रह्मयज्ञेनाहं यक्ष्ये ॥ अथातो ब्रह्मयज्ञं व्याख्यास्यामः—ॐ इषेत्वादि मन्त्रेषु खं ब्रह्मान्तेषु दशप्रणवसहितेषु याः क्रियास्तत्र विवस्वानृषिः प्रजापतिर्देवता सर्वाणि छन्दा ँसि सर्वाणि सामानि प्रतिलिङ्गोक्ता देवता ब्रह्मयज्ञे विनियोगः ॥

न्यासाः—ॐ गौतमभरद्वाजाभ्यां नमः नेत्रयोः । ॐ विश्वामित्रजमदग्निभ्यां नमः श्रोत्रयोः । ॐ वसिष्ठकश्यपाभ्यां नमः नासिकयोः । ॐ अत्रये नमः वाचि । ॐ गायत्र्यग्निभ्यां नमः शिरसि । ॐ उष्णिक्-सवितृभ्यां नमः ग्रीवायाम् । ॐ बृहतीबृहस्पतिभ्यां नमः अनुके = हनौ । ॐ बृहद्रथन्तरद्यावापृथिवीभ्यां नमः बाह्वोः। ॐ त्रिष्टुबिन्द्राभ्यां नमः नाभौ । जगत्यादित्याभ्यां नमः श्रोण्योः । ॐ अतिच्छन्दाप्रजापतिभ्यां नमः लिंगे। ॐ यज्ञायज्ञियवैश्वानराभ्यां नमः गुदे । ॐ अनुष्टुप्विश्वेभ्यो देवेभ्यो नमः ऊर्वोः । ॐ पंक्तिमरुद्भ्यो नमः जान्वोः । ॐ द्विपदाविष्णुभ्यां नमः पादयोः । ॐ विच्छन्दावायुभ्यां नमः नासापुटस्थप्राणेषु । ॐ न्यूनाक्षराच्छ-

न्दोभ्यो नमः सर्वांगेषु। एवमेवाङ्गानि योजयित्वा वेदमयः सम्पद्यते। न कुतश्चिद्भयं विन्दते। शापानुग्रहसामर्थ्यं ब्राह्मं तेजश्च वर्धते। स्वर्गलोकं परं साधनम्। धर्मार्थकाममोक्षस्य च। तस्य दारिद्र्य-दुःख-शोक-रोगभयं न भवति। ऋषिर्देवता छन्दांसि विदित्वा। ऋङ्मयो यजुर्मयः साममयोऽथर्वमयोऽमृतमयो विष्णुरिदं कात्यायनस्य च॥ ॐ कारपूर्विकां गायत्रीं, चतुरो वेदादीन् पठेत्—

वामहस्ततले कुशपवित्रे 'द्वौ दर्भौ' कृत्वा तदुपरि दक्षिणहस्तं अधोमुखं कृत्वा—ॐ भूर्भुवः स्वः तत्सवितु०। ॐ इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोवः सविताप्प्रार्प्पयतुश्श्रेष्ठतमायकर्म्मणऽआप्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयक्ष्मामावस्तेनऽईशतमाघश॰ सोद्ध्रुवाऽअस्मिन्न्गोपतौस्यात-बह्वीर्यजमानस्यपशून्पाहि॥ व्वसोः पवित्रम्। ॐ हिरण्मयेनपात्रेण। सत्त्यस्यापिहितम्मुखम्। योसावादित्येपुरुषः सोसावहम्। ॐ खम्ब्रह्म। व्रतमुपैष्यनन्तरेणाहवनीयञ्च गार्हपत्यञ्च पाङ्क्तिष्ठन्नपऽउपस्पृशति॥ तद्यदपऽउपस्पृशत्यमध्यो वै पुरुषो यदनृतंवदतितेन पूतिरन्तरतो मेध्या वाऽआपो मेध्योभूत्वा व्रतमुपायानीति पवित्रम् वाऽआपः पवित्रपूतो व्रतमुपायानीति तस्माद्वाऽअपऽउपस्पृशति॥ १॥ सोग्निमेवाभीक्षमाणो व्रतमुपैति॥ ॐ पूर्णमदः पूर्णमिदं

पूर्णात्पूर्णमुदुच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ॐ खं ब्रह्म । ॐ खं पुराणम् । ॐ वायुरेव खमिति हस्माह कौरव्यायणीपुत्रो वेद यं ब्राह्मणा विदुर्वेदेन न यद्वेदितव्यम् ॥ ॐ प्राश्नीपुत्रादासुरिवासिनः प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्य ऽउद्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवाजिह्वावतो बाध्योगाज्जिह्वावान् बाध्योगोऽसितावार्षगणादसितो वार्षगणो हरितात् कश्यपाद्धरितः कश्यपः शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचो वागम्भिण्याऽअम्भिण्या-दित्यादात्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥ ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ ॐ अग्नऽआयाहिवीतये गृणानो हव्य-दातये । निहोता सत्सि बर्हिषि ॥ ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये । शंयोरभिस्रवन्तुनः अथानुवाकान् वक्ष्यामि । मण्डलं दक्षिणयक्षिहृदयम् । अथ शिक्षां प्रवक्ष्यामि । अथातोऽधिकारः फलयुक्तानि कर्माणि । अथातो गृह्यस्थालीपाकानां कर्म । वृद्धिरादैच् । समाम्नायः समाम्नातः ।

मयरसतजमनलगसंमितम्। पंचसंवत्सरमयं युगाध्यक्षम्। गौः ग्मा। अथातो धर्मजिज्ञासा। अथातो ब्रह्मजिज्ञासा। योगीश्वरं याज्ञवल्क्यम्। नारायणं नमस्कृत्य॥

इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः। वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः॥

एवं ब्रह्मयज्ञं विधाय पाण्योर्गृहीतकुशानां कुशपवित्रस्य च उत्तरस्यां त्यागं कुर्यात्।

अर्पणम्—ॐ अनेन ब्रह्मयज्ञाख्येन कर्मणा श्रीभगवान् परमेश्वरः प्रीयतां न मम।

ॐ तत्सद्ब्रह्मार्पणमस्तु॥

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः। ॐ अच्युताय नमः। ॐ अच्युताय नमः॥

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु॥

ॐ विष्णवे नमः॥ ततो देवर्षिमनुष्यपितृतर्पणं च कुर्यात्॥

ऋषि (पूजन) तर्पणम्

प्रतिष्ठावाहनं चैव कालज्ञानं तथैव च। पूजोपवीतदानं स्यात् प्राचीनावीतिपूर्वकम् ॥
उत्सर्गः पितरश्चैव आचान्तो वंश एव च। तत्सवितुरित्यारभ्य सावित्र्या श्रवणं चतुः ॥
विरताःस्मेति सकृत् अध्यायादीन् पठेत्तदा। तदेतदृचाऽभ्युक्तं नमस्कारो विसर्जनम् ॥ समुद्रेति जलं प्राश्य द्विराचान्तो गृहं व्रजेत् ॥

अपामार्गमिश्रितैस्त्रिभिस्त्रिभिः कुशैः पृथक् पृथक् गायत्रीं पठित्वा ब्रह्मग्रन्थियुक्ताः सप्तर्षयः कार्याः। एका अरुन्धती च। पीठे नवं सदशं धौतं वस्त्रं रम्भापत्रं वा प्रसार्य तदुपरि तण्डुलपुञ्जं संस्थाप्य तस्मिन् प्रागग्रा उदगग्रा वा दक्षिणतः स्थापनीयाः। नवीनयज्ञोपवीतानि एकस्मिन् बृहती पात्रे, अभिषेकपात्रे स्थापनीयानि ॥

सङ्कल्पः—आचम्य प्राणानायम्य कुश-कुसुम-यव-जलपाणिर्देशकालौ सङ्कीर्त्य—अध्यायोत्सर्गकर्माङ्गत्वेन दीप-कलश-गणेशपूजनपूर्वकं (रुद्रमन्त्रैर्जलधारया रुद्रं सपूर्वपूजनं अभिषेकं कारयन्) ऋषिस्थापन-पूजनं, यज्ञोपवीततन्तुदेवतापूजनं, ऋषितर्पणं, वंशानां श्रवणं, कृताकृतं ऋषिश्राद्धं, रक्षाबन्धन-पूजनं, स्वपितृभ्यो यज्ञोपवीतदानं, ब्राह्मणेभ्यो यज्ञोपवीतदानं, नवीनयज्ञोपवीतधारणं, जीर्णयज्ञो-पवीतोत्सर्गं, रक्षासूत्रबन्धनं चाऽहं करिष्ये। दीप-कलश-गणेशपूजां विधाय ऋचंवाचमित्यध्यायः पठित्वा

प्रतिष्ठापनम्—पुष्पाक्षतान् ऋष्युपरि क्षिपन्—ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टं

यज्ञ समिमन्दधातु । विश्वेदेवासऽइहमादयन्तामोम् २॥ प्रतिष्ठ ॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञन यजन्ते सर्वमेव प्रतिष्ठितम्भवति । ॐ प्रतिष्ठा सुप्रतिष्ठितमस्तु ॥

आवाहनम्—गन्धाक्षतान् गृहीत्वा दक्षिणस्थं ऋषिं स्पृशन्—

प्रथमम्—ॐ भूर्भुवः स्वः कश्यपाय नमः, कश्यपं आवाहयामि । भो कश्यप ! इहागच्छ इह तिष्ठ मम पूजां गृहाण, यावत् पूजां करोमि तावत् त्वं सुस्थिरः सुप्रसन्नो वरदो भव ॥१॥

द्वितीयम्—	ॐ भूर्भुवः स्वः	भरद्वाजाय नमः,	भरद्वाजं	आवाहयामि ।	भो भरद्वाज····	वरदो भव	॥२॥
तृतीयम्—	,,	गौतमाय नमः,	गौतमं	,,	। भो गौतम! ····	,,	॥३॥
चतुर्थम्—	,,	अत्रये नमः,	अत्रिम्	,,	। भो अत्रे ! ····	,,	॥४॥
पञ्चमम्—	,,	जमदग्नये नमः,	जमदग्निम्	,,	। भो जमदग्ने !····	,,	॥५॥
षष्ठम्—	,,	वसिष्ठाय नमः,	वसिष्ठम्	,,	। भो वसिष्ठ ! ····	,,	॥६॥
सप्तमम्—	,,	विश्वामित्राय नमः,	विश्वामित्रं	,,	। भो विश्वामित्र!····	,,	॥७॥
अष्टमीम्—	,,	अरुन्धत्यै नमः,	अरुन्धतीं	,,	। भो अरुन्धति !····	सुस्थिरा	

सुप्रसन्ना वरदा भव ॥८॥

ॐ इमामेव गौतम-भरद्वाजावयमेव गौतमोऽयं भारद्वाजऽइमामेव विश्वामित्र-जमदग्नीऽअयमेव विश्वामित्रोऽयं जमदग्निरिमावेव वसिष्ठ-कश्यपावयमेव वसिष्ठोऽयं कश्यपो वागेवात्रिर्वाचा ह्यन्नमद्यतेतिर्हवैनामैतद्यदत्रिरिति सर्वस्यात्ता भवति सर्वस्यान्नं भवति यऽएवं वेद ।

ध्यानम्—ॐ सप्तऽऋषयः प्रतिहिताः शरीरेसप्तरक्षन्तिसदमप्रमादम् । सप्तापः स्वपतोलोकमीयुस्तत्रजागृतोऽअस्वप्नजौसत्रसदौचदेवौ ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् । समूढमस्यपाᳬसुरे स्वाहा ॥ ॐ सहस्रशी० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, ध्यानपूर्वकमावाहनं समर्पयामि ॥

आसनम्—सुवर्णघट्टितं दिव्यं नानारत्नसमन्वितम् । आसनं रुचिरं यच्च गृह्यन्तां भो मुनीश्वराः ! ॥

ॐ पुरुषऽए० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः आसनं समर्पयामि ।

पाद्यम्—गंगाजलं समानीतं गन्धद्रव्येण संयुतम् । पाद्यार्थं प्रतिगृह्णन्तु कश्यपाद्या महर्षयः ॥

ॐ एतावानस्य० ॥ ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः पाद्यं समर्पयामि ।

अर्घ्यम्—सुवर्णपात्रसंयुक्तं गन्धपुष्पाक्षतैर्युतम् । सप्तर्षयः प्रगृह्णन्तु इदमर्घ्यं समर्पितम् ॥

ॐ त्रिपादूर्ध्वं०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः अर्घ्यं समर्पयामि।

आचमनम्—कर्पूरवासितं तोयं सुवर्णकलशे स्थितम्। दत्तमाचमनीयं च ऋषीणां प्रीतये सदा॥

ॐ ततोवि०।ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः आचमनीयं समर्पयामि।

स्नानम्—सुगन्धिद्रव्यसंयुक्तं पवित्रं मङ्गलं जलम्। स्नानार्थं वः समानीतं गृह्यन्तां मुनयो मुदा॥

ॐ तस्माद्यज्ञात्सर्व०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः स्नानं सम०॥

पञ्चामृतस्नानम्—पयो दधि घृतं चैव मधुशर्करयाऽन्वितम्। पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम्॥

ॐ पञ्चनद्यः०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः पञ्चामृतस्नानं सम०॥

गन्धोदकस्नानम्—ॐ गन्धद्वारां दुराधर्षां नित्य पुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, गन्धोदकस्नानं समर्पयामि॥ पुनः पूजा।

महाभिषेकस्नानम्—ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः महाभिषेकस्नानं सम०॥

वस्त्रम्—सूक्ष्माण्यतीव शुभ्राणि वस्त्राणि विविधानि च। ऋषयः प्रतिगृह्णन्तु उष्णशीतनिवारणे॥

ॐ तस्माद्यज्ञा०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः वस्त्रं समर्पयामि।

यज्ञोपवीतम्—नानामन्त्रैः समुद्भूतं त्रिवृतं ब्रह्मसूत्रकम् । प्रत्येकं दीयते स्वच्छं गृह्णन्तु ऋषयो मुदा ॥

ॐ तस्माद्श्वा० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः यज्ञोपवीतानि सम०

गन्धम्—आत्मसन्तापहारं च सुगन्धद्रव्यसंयुतम् । चन्दनं तत्प्रयच्छामि ऋषीणां प्रीतिहेतवे ॥

ॐ तंयज्ञं० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः, गन्धं समर्पयामि ॥

अक्षताः—शुभ्रतण्डुलजाः शुक्लाः शंखशुभ्रा मनोरमाः । अक्षतान् संप्रयच्छामि गृह्णन्तु मुनिपुंगवाः ॥

ॐ अक्षन्नमी० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः अक्षतान् समर्प० ॥

हरिद्रा-कुंकुमद्रव्याणि—हरिद्रां कुंकुमं चैव कज्जलं भूषणानि च । कङ्कणं कण्ठसूत्रं च गृहाण परमेश्वराः ॥

ॐ अहिरिव० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः हरिद्रा-कुंकुमद्रव्याणि स०

पुष्पाणि—माल्यादीनि सुगन्धीनि मालत्यादीनि सत्तमाः । मयार्पितानि पुष्पाणि गृह्णन्तु मुनिपुंगवाः ॥

ॐ यत्पुरुषम्० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः पुष्पाणि समर्पयामि ॥

धूपम्—कृष्णागुरुसमुद्भूतो धूपोऽयं च दशांगकः । सुगन्धः कश्यपादिभ्य ऋषिभ्यो दीयतेऽधुना ॥

ॐ ब्राह्मणो० । ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः धूपं आघ्रापयामि ।

दीपम्—पञ्चवर्तिसमायुक्तः सर्वमङ्गलशोभनः। मया निवेदितो भक्त्या दीपोऽयं प्रतिगृह्यताम् ॥
ॐ चन्द्रमा०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः, दीपं दर्शयामि ॥

नैवेद्यम्—फलमूलसमायुक्तं नानाशाकसमन्वितम्। शर्करा-घृतसंयुक्तं नैवेद्यं प्रतिगृह्यताम् ॥
ॐ नाभ्या०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः नैवेद्यं समर्पयामि ॥
नैवेद्यमध्ये पानीयं समर्पयामि। उत्तरापोशानं, हस्तप्रक्षालनं, मुखप्रक्षालनं, करोद्वर्तनार्थे चन्दनं च समर्पयामि ॥

फलम्—नारिकेलं च कूष्माण्डं कदली-कर्कटीफलम्। ऋतुकालोद्भवं चान्यद् दीयतेऽद्य मुनीश्वराः ॥
ॐ याः फलिनी०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः फलानि सम० ॥

ताम्बूलम्—पूगीफलं सकर्पूरं नागवल्लीदलैर्युतम्। एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ यत्पुरुषेण०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः ताम्बूलं समर्पयामि ॥

दक्षिणा—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
ॐ हिरण्यगर्भः०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिसप्तऋषिभ्यो नमः दक्षिणां समर्पयामि ॥

कर्पूरार्तिक्यम्–ब्रह्मिष्ठा ब्रह्मरूपा च कश्यपाद्या महर्षयः। ब्रह्मप्रज्ञादिदातारः सन्तु मे कीर्तिकर्मणि ॥

ॐ इदꣳहविः०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः कर्पूरार्तिक्यं दर्शयामि

प्रदक्षिणा—यानि कानि च पापानि जन्मान्तरकृतानि च। तानि तानि विनश्यन्तु प्रदक्षिणपदे पदे ॥

ॐ सप्तास्या०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः प्रदक्षिणां समर्पयामि॥

पुष्पाञ्जलिः—शरणागत-दीनार्तपरित्राणपरायणाः। रक्षन्तु मुनयः सर्वे मामद्य शरणागतम् ॥

सप्तर्षयः शुभा श्रेष्ठाः सर्वेषां च शुभप्रदाः। पुष्पाञ्जलिं मया दत्तं गृह्णन्तु मुनिसत्तमाः ॥

ॐ यज्ञेन०। ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः नमस्कारं समर्पयामि ॥

प्रार्थना–मन्त्रहीनं क्रियाहीनं भक्तिहीनं मुनीश्वराः। यत्पूजितं मया सर्वं परिपूर्णं तदस्तु मे ॥

ॐ भूर्भुवः स्वः अरुन्धतीसहितकश्यपादिस्वऋषिभ्यो नमः प्रार्थनां समर्पयामि ॥

अर्पणम् — अनेन मया वेदोत्सर्जनाङ्गत्वेन कृतेन ध्यानावाहनादि-षोडशोपचारादिपूजनेन अरुन्धती-सहितकश्यपादिसप्तर्षिस्वऋषयः प्रीयन्ताम् न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥ इति ऋषिपूजनम्

**

तन्तुदेवता-पूजनम्

यज्ञोपवीतप्रक्षालनम्—आपोहिष्ठेति तिसृणां सिन्धुद्वीप ऋषिः, आपो देवता, गायत्री छन्दः यज्ञोपवीत-धारणे विनियोगः—ॐ आपोहिष्ठामयोभुवस्तानऽऊर्जेदधातन । महेरणायचक्षसे ॥ योवःशिवतमो रसस्तस्यभाजयतेहनः । उशतीरिवमातरः ॥ तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ । आपोजन यथाचनः ॥ यज्ञोपवीतानि प्रक्षाल्यानन्तरं दशगायत्रीमन्त्रैरभिमन्त्र्य तन्तुदेवतानामावाहनम्—

प्रथमतन्तौ—प्रणवस्य ब्रह्मा ऋषिः, परमात्मा देवता, गायत्री छन्दः, ॐकारावाहने विनियोगः। प्रथमतन्तौ ॐकारमावाहयामि ॥

द्वितीयतन्तौ—अग्निन्दूतमिति मेधातिथिर्ऋषिः, अग्निर्देवता, गायत्री छन्दः, अग्न्यावाहने विनियोगः—ॐ अग्निन्दूतम्पुरोदधेहव्यवाहमुपब्रुवे । देवाँ२॥ऽआसादयादिह । द्वितीयतन्तौ अग्निमावाहयामि ।

तृतीयतन्तौ—नमोस्तुसर्पेभ्य इत्यस्य प्रजापतिर्ऋषिः, सर्पा देवताः, अनुष्टुप् छन्दः, सर्पावाहने विनियोगः—ॐ नमोस्तुसर्पेभ्योयेकेचपृथिवीमनु ॥ येऽअन्तरिक्षेयेदिवितेभ्यः सपर्भ्योनमः ॥ तृतीयतन्तौ सर्पानावाहयामि ॥

चतुर्थतन्तौ—वयꣳसोमेत्यस्य बन्धुर्ऋषिः, सोमो देवता, गायत्री छन्दः, सोमावाहने विनियोगः।
ॐ वयꣳसोमव्रतेतवमनस्तनूषुबिभ्रतः। प्रजावन्तः सचेमहि॥ चतुर्थतन्तौ सोममावाहयामि॥
पञ्चमतन्तौ—उदीरतामित्यस्य शङ्ख ऋषिः, पितरो देवता, त्रिष्टुप् छन्दः, पित्रावाहने विनियोगः।
ॐ उदीरतामवरऽउत्परासऽउन्मध्यमाः पितरः सोम्यासः॥ असुँयऽईयुरवृकाऽऋतज्ञास्तेनोवन्तु-पितरो हवेषु॥ पञ्चमतन्तौ पितृनावाहयामि॥
षष्ठतन्तौ—प्रजापतेरित्यस्य हिरण्यगर्भ ऋषिः, प्रजापतिर्देवता, त्रिष्टुप् छन्दः, प्रजापत्यावाहने विनियोगः॥ ॐ प्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव। यत्कामास्तेजुहुमस्तन्नोऽअस्तु वयꣳ स्यामपतयोरयीणाम्॥ षष्ठतन्तौ प्रजापतये नमः प्रजापतिमावाहयामि॥
सप्तमतन्तौ—आनोनियुद्भिरित्यस्य वसिष्ठ ऋषिः, अनिलो देवता, त्रिष्टुप् छन्दः, अनिलावाहने विनियोगः॥—आनोनियुद्भिः शतिनीभिरद्ध्वरꣳ सहस्रीणिभिरुपयाहियज्ञम्। वायोऽअस्मिन्त्सवने मादयस्वयूयम्पातस्वस्तिभिः सदानः॥ सप्तमतन्तौ अनिलाय नमः अनिलमावाहयामि॥
अष्टमतन्तौ—सुगाव इत्यस्यात्रिर्ऋषिः, गृहपतयो देवता, आर्षी त्रिष्टुप् छन्दः, यमावाहने विनियोगः।

ॐ सुगावोदेवाः सदनाऽअकर्मणऽआजग्मेदꣳ सवनञ्जुषाणाः । भरमाणाव्वहमानाहवीꣳष्यस्मे धत्तवसवोवसूनिस्वाहा ॥ अष्टमतन्तौ यमाय नमः, यममावाहयामि ॥

नवमतन्तौ–विश्वेदेवासऽआगत० इत्यस्य मधुच्छन्दा ऋषिः, विश्वेदेवा देवताः, त्रिष्टुप् छन्दः, विश्वेषां देवानामावाहने विनयोगः ॥ ॐ विश्वेदेवासऽआगतशृणुतामऽइमꣳ हवम् । एदम्बर्हिर्निषीदत ॥ नवमतन्तौ विश्वेभ्यो देवेभ्यो नमः, विश्वान् देवान् आवाहयामि ॥

ग्रन्थिदेवता-आवाहनम्–

ब्रह्मयज्ञानमित्यस्य प्रजापतिर्ऋषिः, ब्रह्मा देवता, गायत्री छन्दः, ग्रन्थिमध्ये ब्रह्मावाहने विनियोगः । ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः । सुरुचोवेनऽआवः ॥ सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥ इदंविष्णुरित्यस्य मेधातिथिर्ऋषिः विष्णुर्देवता, गायत्री छन्दः, ग्रन्थिमध्ये विष्ण्वावाहने विनियोगः–ॐ इदंविष्णु० ॥ त्र्यम्बकमित्यस्य वसिष्ठ ऋषिः, रुद्रो देवता, विराट् ब्राह्मी त्रिष्टुप् छन्दः, ग्रन्थिमध्ये रुद्रावाहने विनियोगः–ॐ त्र्यम्बकं यजामहे सुगन्धि-

म्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ यज्ञोपवीत ग्रन्थिदेवताभ्यो नमः, ग्रन्थिदेवता आवाहयामि ॥ प्रणवाद्यावाहित देवताभ्यो नमः, यथास्थानमहं न्यसामि ॥

मानसोपचारैः सम्पूज्य ध्यानम्—प्रजापतेर्यत् सहजं पवित्रं कार्पाससूत्रोद्भवब्रह्मसूत्रम् ।
ब्रह्मत्वसिद्धये च यशः प्रकाशं जपस्य सिद्धं कुरु ब्रह्मसूत्रम् ॥

उत्सर्गाख्यं ऋषितर्पणम्—

सङ्कल्पः—आचम्य प्राणानायम्य देशकालौ सङ्कीर्त्य 'छन्दसां क्वचिदनध्यायादिकाले पठनादनधिकारिभिः श्रावणाच्च प्राप्तमालिन्यस्य निरासार्थमुत्सर्गाख्यं तर्पणमहं करिष्ये' सव्येन प्रागग्रैर्दर्भैर्देवतीर्थेन

देवतर्पणम्—देवानामञ्जलित्रयं दद्युः—ॐ विश्वेदेवासऽआगतशृणुतामऽइमᳪ हवम् । एदम्बर्हिर्निषीदत ॥ विश्वेदेवाः शृणुतेमᳪ हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्निजिह्वाऽउतवायजत्राऽआसद्यास्मिन् बर्हिषिमादयध्वम् ॥ देवानावाह्य—ॐ देवास्तृप्यन्तु । ॐ छन्दांसि तृ० । ॐ वेदास्तृ० । ॐ ऋषयस्तृ० । ॐ पुराणचार्यास्तृप्यन्ताम् । ॐ गन्धर्वास्तृप्यन्ताम् । ॐ इतराचार्यास्तृप्यन्ताम् । ॐ संवत्सरसावयवस्तृप्यन्ताम् ॥

ऋषि-तर्पणम्

वंशानां श्रवणं दीप-कलश-गणेशपूजां विधाय तूष्णीं आचम्य—ॐ अथ वᳪंशः समानमासाज्जीवीपुत्रात्साञ्जीवीपुत्रो माण्डूकायनेर्माण्डूकायनिर्माण्डव्यान्माण्डव्यः कौत्सात्कौत्सो महित्थेर्माहित्थिर्वामकक्षायणाद्वामकक्षायणो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनाद्यज्ञवचा राजस्तम्बायनस्तुरात्कावषेयात्तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्मस्वयम्भुब्रह्मणे नमः ॥ ॐ वंशोक्ता ऋषयस्तृप्यन्ताम्[1] ॥ १ ॥ ॐ अथवᳪ शस्तदिदं वयᳪ शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः सांकृत्याच्च भारद्वाजाच्च भारद्वाजऽऔद्वाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्चात्रेयाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्य उ

---

१ ऋष्युपरि उदकं क्षिपेत् ।

कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ २ ॥ आग्निवेश्यः सैतवात् सैतवः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो वैजवापायनाद्वैजवापायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्यात् जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ॥ ३ ॥ आत्रेयोमाण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्यात्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्यऽआङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीचऽआथर्वणाद्दध्यङ्ङाथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्राध्वꣳसनात्प्राध्वꣳसनऽएकर्षेरेकर्षिर्विप्रजितेर्विप्रजितिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगा-

त्सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ॥४॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ॥ अथ वं शस्तदिदं वयं शौर्पणाय्याच्छौर्पणाय्यो गौतमाद्गौतमो वात्स्याद्वात्स्यो वात्स्याच्च पाराशर्याच्च पाराशर्यः साङ्कृत्याच्च भारद्वाजाच्च भारद्वाजऽऔद्वाहेश्च शाण्डिल्याच्च शाण्डिल्यो वैजवापाच्च गौतमाच्च गौतमो वैजवापायनाच्च वैष्टपुरेयाच्च वैष्टपुरेयः शाण्डिल्याच्च रौहिणायनाच्च रौहिणायनः शौनकाच्च जैवन्तायनाच्च रैभ्याच्च रैभ्यः पौतिमाष्यायणाच्च कौण्डिन्यायनाच्च कौण्डिन्यायनः कौण्डिन्याभ्यां कौण्डिन्याऽऔर्णवाभेभ्यऽऔर्णवाभाः कौण्डिन्यात् कौण्डिन्यः कौण्डिन्यात्कौण्डिन्यः कौण्डिन्याच्चाग्निवेश्याच्च ॥ ५ ॥ आग्निवेश्यः सैतवात्सैतवः पाराशर्यात् पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च गौतमाच्च गौतमो भारद्वाजाद्भारद्वाजो बलाकाकौशिकाद्बलाकाकौशिकः काषायणात्काषायणः सौकरायणात्सौकरायणस्त्रैवणेस्त्रैवणिरौपजन्धनेरौपजन्धनिः सायकायनात्सायकायनः कौशिकायनेः कौशिकायनिर्घृतकौशिकाद्घृतकौशिकः पाराशर्यायणात्पाराशर्यायणः पाराशर्यात्पाराशर्यो जातूकर्ण्याज्जातूकर्ण्यो भारद्वाजाद्भारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुरायणस्त्रैवणे-

स्त्रैवणिरौपजन्धनेरौपजन्धनिरासुरेरासुरिर्भारद्वाजाद्भारद्वाजऽआत्रेयात् ।।६।। आत्रेयादात्रेयो-
माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्याच्छाण्डिल्यः कैशोर्यात्काप्या-
त्कैशोर्यः काप्यः कुमारहारितात्कुमारहारितो गालवाद्गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो
वत्सनपातो बाभ्रवाद्वत्सनपाद्बाभ्रवः पथः सौभरात्पन्थाः सौभरोऽयास्यादाङ्गिरसादयास्यऽ-
आङ्गिरसऽआभूतेस्त्वाष्ट्रादाभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौदधी-
चऽआथर्वणाद्दध्यङ्ङाथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनात् प्राध्वꣳ
सनऽएकर्षेरेकर्षिर्विप्रजितेर्विप्रजितिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात्सनातनः सनगात्
सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ॥७॥
अथ वꣳशस्तदिदं वयः भारद्वाजीपुत्राद्भारद्वाजीपुत्रो वात्सीमाण्डवीपुत्राद्वात्सीमाण्डवीपुत्रः
पाराशरीपुत्रात्पाराशरीपुत्रो गार्गीपुत्राद्गार्गीपुत्रः पाराशरीकौण्डिनीपुत्रात्पाराशरीकौण्डिनीपुत्रो
गार्गीपुत्राद्गार्गीपुत्रो गार्गीपुत्राद्गार्गीपुत्रो वाडेयीपुत्राद्वाडेयीपुत्रो मौषिकीपुत्रान्मौषिकीपुत्रो
हारिकर्णीपुत्राद्धारिकर्णीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पैङ्गीपुत्रात्पैङ्गीपुत्रः शौनकीपुत्रात्

शौनकीपुत्रः ॥८॥ काश्यपीबालाक्यामाठरीपुत्रात्काश्यपीबालाक्यामाठरीपुत्रः कौत्सीपुत्रात्कौत्सीपुत्रो बौधीपुत्राद्बौधीपुत्रः शालङ्कायनीपुत्राच्छालङ्कायनीपुत्रो वार्षगणीपुत्राद्वार्षगणीपुत्रो गौतमीपुत्राद्गौतमीपुत्रऽआत्रेयीपुत्रादात्रेयीपुत्रो गौतमीपुत्राद्गौतमीपुत्रो वात्सीपुत्राद्वात्सीपुत्रो भारद्वाजीपुत्राद्भारद्वाजीपुत्रः पाराशरीपुत्रात्पाराशरीपुत्रो वार्कारुणीपुत्राद्वार्कारुणीपुत्रऽआर्तभागीपुत्रादार्तभागीपुत्रः शौङ्गीपुत्राच्छौङ्गीपुत्रः सांकृतीपुत्रात्सांकृतीपुत्रः ॥९॥ आलम्बीपुत्रादालम्बीपुत्रऽआलम्बायनीपुत्रादालम्बायनीपुत्रो जायन्तीपुत्राज्जायन्तीपुत्रो माण्डूकायनीपुत्रान्माण्डूकायनीपुत्रो माण्डूकीपुत्रान्माण्डूकीपुत्रः शाण्डिलीपुत्राच्छाण्डिलीपुत्रो राथीतरीपुत्राद्राथीतरीपुत्रः क्रौञ्चिकीपुत्राभ्यां क्रौञ्चिकीपुत्रो वैदभृतीपुत्राद्वैदभृतीपुत्रो भालुकीपुत्राद्भालुकीपुत्रः प्राचीनयोगीपुत्रात् प्राचीनयोगीपुत्रः साञ्जीवीपुत्रात्साञ्जीवीपुत्रः कार्शकेयीपुत्रात्कार्शकेयीपुत्रः॥१०॥ प्राश्नीपुत्रादासुरिवासिनः । प्राश्नीपुत्रऽआसुरायणादासुरायणऽआसुरेरासुरिर्याज्ञवल्क्याद्याज्ञवल्क्यऽउद्दालकादुद्दालकोऽरुणादरुणऽउपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाजश्रवसो वाजश्रवाजिह्वावतो बाध्योगाज्जिह्वावान् बाध्योगोऽसिताद्वार्षगणादसितो वार्षगणो हरितात्कश्यपात् हरितः कश्यपः

शिल्पात्कश्यपाच्छिल्पः कश्यपः कश्यपान्नैध्रुवेः कश्यपो नैध्रुविर्वाचोवागम्भिण्याऽअम्भिण्या-दित्यादादित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥११॥ वंशोक्ता ऋषयस्तृप्यन्ताम् ॥ चतुर्वारं गायत्रीं जपेत् ॥ ततः सावित्र्याश्चतुः कृत्वाऽनुब्रुवणम् ॥ सर्वेषां तदन्ते ॐ विरताः स्म इति सकृदुच्चैर्ब्रूयात् ॥

ॐ इषेत्त्वारभ्य ॐ ईशावास्यपर्यन्तम् । ॐ खं ब्रह्म चत्वारिंशदध्यायोक्ताः ऋषयस्तृप्यन्ताम् । ॐ व्रत-मुपैष्यन् इत्यारभ्य श्वेतकेतुर्हवा आरुणेयः पर्यन्तं प्राश्नीपुत्रादासुरीवासिनः ॥ ॐ चतुर्दश-काण्डेषु अध्यायोक्ता ऋषयस्तृप्यन्ताम् २ । ॐ इषेत्त्वारभ्य १ इयत्यग्रे २० (शेषं पञ्चसप्ततिः) ॐ हिरण्मयेन पात्रेण । ॐ खं ब्रह्म । शतोक्ता ऋषयस्तृप्यन्ताम् ॥ ॐ व्रतमुपैष्यनित्यारभ्य अथयामिच्छेद्दुगर्भन्दधीतेति सप्तसहस्रषट् शेषं चतुर्विꣳशतिः प्राश्नीपुत्रादासुरीवासिनः ॐ चतुर्दशकाण्डेषु शतोक्ता ऋषयस्तृप्यन्ताम् २ । ॐ व्रतमुपैष्यनित्यारभ्य भूमिरन्तरिक्षं द्यौरिति । प्राश्नीपुत्रादासुरीवासिनः ॐ चतुर्दशकाण्डे प्रपाठोक्ता ऋषयस्तृप्यन्ताम् ॥ ॐ अन्त्यकाण्डकोक्ता ऋषयस्तृप्यन्ताम् ॥ ॐ चतुर्दशकाण्डे अन्त्यफक्किकोक्ता ऋषयस्तृप्यन्ताम् ॥

नमस्कारः—ततः तदेतदृचाभ्युक्तं न मृषा श्रान्तं यदवन्ति देवा इति नहैवैवं विदुषः किञ्चन मृषा श्रान्तं भवति तथोहास्यैतत्सर्वं देवाऽअवन्ति ॥१॥

विसर्जनम्—उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे । उपप्रयन्तुमरुतः सुदानवऽइन्द्रप्राशूर्भवासचा ॥

स्वस्वप्रवरान् विसर्जयेत् ॥

जले प्रास्यन्—ॐ समुद्रङ्गच्छस्वाहान्तरिक्षंगच्छस्वाहादेवꣳ सवितारङ्गच्छस्वाहामित्रावरुणौगच्छस्वाहाऽहोरात्रेगच्छस्वाहाछन्दाꣳसिगच्छस्वाहा द्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहा सोमङ्गच्छस्वाहा दिव्यन्नभोगच्छस्वाहाग्निं वैश्वानरङ्गच्छस्वाहा मनोमेहार्दियच्छदिवन्तेधूमोगच्छतुस्वर्ज्योतिः पृथिवींभस्मनापृण स्वाहा ॥

ततो द्विराचम्य अर्पणम्—अनेन अध्यायोत्सर्गकर्माङ्गत्वेन कृतेन ऋषिपूजनतर्पणादिकर्मणा श्रीभगवान् परमेश्वरः प्रीयताम् न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

रक्षाबन्धनपूजा—यव-दूर्वा-सर्षप-चन्दन-गोमय-दधिसहितां रक्षां ताम्रपात्रे पुटे वा निधाय पात्रं स्पृशन् नारायणकवचादिकं पठेत् ॥

कृताकृतम् ऋषिश्राद्धम्

कृतप्राणायामो देशकालौ संकीर्त्य, संकल्पः—उत्सर्गाङ्गभूतमृषिश्राद्धमहं करिष्ये।

दिग्बन्धः—ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम्। समूढमस्यपाᳬसुरे स्वाहा॥

उपहारप्रोक्षणम् देशकालपात्रसम्पदस्तु गन्धाक्षतादिः—ऋषिश्राद्धस्योपहाराः शुचयो भवन्तु॥ अरुन्धतीसहितकश्यपादिस्वऋषीणामिदमासनम् यथायथाविभागं वः स्वाहा। अरुन्धतीसहितकश्यपादिस्वऋषयः यथादत्तं गन्धाद्यर्चनं यथायथाविभागं वः स्वाहा॥ ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं सप्तसंख्याकान् ब्राह्मणान् यथाकालं यथासम्पन्नान्नेन तर्पयिष्ये। तेन अरुन्धतीसहितकश्यपादिस्वऋषयः प्रीयन्ताम्॥

आचार्यदक्षिणा—ऋषिश्राद्धसाङ्गतासिद्ध्यर्थं हिरण्यनिष्क्रयभूतांदक्षिणां आचार्याय तुभ्यमहं सम्प्रददे।

आचार्यः—कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात्। कामोदाताकामःप्रतिग्रहीताकामैतत्ते॥

उपविष्टेषु ब्राह्मणेषूदकादिदानम्—ॐ शिवा आपः सन्तु। सौमनस्यमस्तु। अक्षतं चारिष्टमस्तु। अघोरा ऋषयः सन्तु। सर्वत्र विप्राः—'सन्तु'।

भूयसी—उत्सर्गकर्मणो न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां संप्रददे॥
प्रार्थना—उत्सर्गाङ्गभूतं ऋषिश्राद्धं परिपूर्णमस्तु। आचार्यादयः 'अस्तु परिपूर्णम्'॥ सहनोऽस्तु, सहनोऽवतु सहनऽइदं वीर्यवदस्तु ब्रह्मऽइन्द्रस्तद्वेद येन यथा न विद्विषामहे। पश्चात्—ॐ उभाकवीयुवायोनोधर्मः परापतत्। परिसख्यानिधर्मिणोविसख्यानिविसृजामहे॥ इति ऋषिश्राद्धम्॥

स्वपितृभ्यो यज्ञोपवीतदानम्—

प्राचीनावीति (अपसव्य) दक्षिणाभिमुखाः सर्वे पितृका अपितृकाः कुशोदकं गृहीत्वा पुरतो यज्ञोपवीतानि निधाय

प्रथमम्—अमुकगोत्रेभ्यः अस्मत्पितृ-पितामह-प्रपितामहेभ्यः।

द्वितीयम्—अमुकगोत्रेभ्यः अस्मत् मातामह-प्रमातामह-वृद्धप्रमातामहेभ्यः।

तृतीयम्—कव्यवाडनलादिदिव्यपितृभ्यः इमानि यज्ञोपवीतानि स्वधा सम्पद्यन्ताम्॥ ऋष्युपरि। ततो सव्यं कृत्वा ब्राह्मणं ब्राह्मणान् वा गन्धादिना सम्पूज्य यज्ञोपवीतानि दत्त्वा पश्चात् सर्वैः स्वयमपि विधिवद् धार्याणि॥

यज्ञोपवीतधारणविधिः—आचम्य यज्ञोपवीतं गृहीत्वा सज्जीकृत्य ॐ यज्ञोपवीतमितिमन्त्रस्य परमेष्ठी ऋषिः,

लिंगोक्ता देवता, त्रिष्टुप्छन्दः, यज्ञोपवीतधारणे विनियोगः ॥ पृथक् पृथक् धारणम्—ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्। आयुष्यमग्र्यम्प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ यज्ञोपवीतमसि यज्ञस्यत्वा यज्ञोपवीतेनोपनह्यामि ॥

शिरोमार्गेण जीर्णयज्ञोपवीतत्यागः—एतावद्दिनपर्यन्तं ब्रह्म त्वं धारितं मया।

जीर्णत्वात् तत् परित्यागो गच्छ सूत्र यथासुखम् ॥ पश्चात् यथाशक्ति गायत्रीजपं कुर्यात्।

अर्पणम्—अनेन नवयज्ञोपवीतधारणार्थे कृतेन यथाशक्तिगायत्रीजपकर्मणा श्रीसविता देवता प्रीयतां न मम ॥ ॐ तत्सत् ब्रह्मार्पणमस्तु ॥

रक्षा-बन्धनम् (नराणां दक्षिणनाड्यां नारीणां वामनाड्याम्)—

येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल ॥

आचार्यादिब्राह्मणपूजनं कृत्वा तेभ्यो दक्षिणां दत्वा ब्राह्मणाशिषो गृह्णीयात् ॥ श्रद्धा चेत्—ॐ तत्सत् अद्येह कृतस्योत्सर्गाख्यकर्मणः साङ्गतासिद्ध्यर्थं यथावकाशेन यथाशक्ति ब्राह्मणान् भोजयिष्ये—सङ्कल्पयेत् ॥ यथावसरे भक्षयेच्च ॥ इति श्रावणी-पद्धतिः ॥

उपाकर्म

गुरुः हस्तौ पादौ प्रक्षाल्य द्विराचम्याऽऽवसथ्याग्नेर्लौकिकाग्नेर्वा पश्चाच्छिष्यैः सह प्राङ्मुख उपविश्य प्राणायाम-त्रयं कृत्वा देशकालौ सङ्कीर्त्य सङ्कल्पः—श्रीपरमेश्वरप्रीत्यर्थं अध्यायोपाकर्मणि पञ्चभूसंस्कार-पूर्वकमग्निस्थापनमहं करिष्ये।

पञ्चभूसंस्कारः (१) दर्भैःपरिसमूह्य, (२) गोमयोदकेनोपलिप्य, (३) स्रुवेणोल्लिख्य, (४) अनामिकाङ्गुष्ठाभ्यामुद्धृत्य। (५)उदकेनाभ्युक्ष्य। अग्निं प्रतिष्ठाप्य पात्रस्थापनादि कुर्यात्॥ तत्र पूर्वेण ब्रह्मणो गमनम्॥ अग्नेरुत्तरतः पात्रासादनम्॥ द्वे पवित्रे, ताम्रमयी आज्यस्थाली॥ पालाश्यः समिधः॥ प्राञ्चावाघारौ॥ समिद्धतमे आज्यभागौ॥ तिलहोमः सावित्रीमन्त्रेण॥ पूर्णपात्रं, दक्षिणा॥ त्रिरात्रं लोमनखानामनिकृन्तनम्॥ ऋषिच्छन्ददेवतास्मरणम्—इषेत्वा० इत्यादिकस्य खम्ब्रह्मान्तस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वानृषिः। वायुर्देवता। गायत्र्यादीनि सर्वाणि छन्दांसि। अध्यायोपा-कर्मणि विनियोगः॥ देवताध्यानम्—प्रजापतिम्, इन्द्रम्, अग्निम्, सोमम्, पृथिवीम्, अग्निम् ब्रह्माणम्, छन्दांसि, अन्तरिक्षम्, वायुम्, ब्रह्माणम्, छन्दांसि, दिवम्, सूर्यम्, ब्रह्माणम्,

छन्दांसि, दिशः, चन्द्रमसम्, ब्रह्माणम्, छन्दांसि, प्रजापतिम्, देवान्, ऋषीन्, श्रद्धाम्, मेधाम्, सदसस्पतिम्, अनुमतिम्। एताः प्रधानदेवता आज्येन। सदसस्पतिम् धानाभिः। सवितारम् तिलैः। अग्निं स्विष्टकृतं धानाशेषेण॥ अग्निम्, वायुम्, सूर्यम्, अग्नीवरुणौ, अग्नीवरुणौ, अग्निम्, वरुणम्, सवितारम्, विष्णुम्, विश्वान् देवान्, मरुतः, स्वर्क्कान्, वरुणम्, प्रजापतिम्॥ एता अङ्गप्रधानार्था देवता अस्मिन् कर्मण्यहं यक्ष्ये॥ ब्रह्मवरणम्—दक्षिणतो ब्रह्मासनमास्तीर्य। अमुकशर्मन् अस्मिन् कर्मणि, त्वं ब्रह्मा भव। भवामि—प्रतिवचनम्।

ब्रह्मा तूष्णीं आसनावलोकनं आसनात्तृणनिरसनञ्च कृत्वा उपविशेत्। अग्नेरुत्तरतः प्रणीतार्थमासनद्वयं निधाय प्रणीता चमसं वामहस्ते कृत्वा आत्माभिमुखं जलेनापूर्य प्रथमासने निधाय चमसदण्डमालभ्य ब्रह्माणमवलोक्य तेन संकेतादिनाऽनुज्ञातः प्रणीयोत्तरासने निदध्यात्॥ ततो उदगग्रैः प्रागग्रैः कुशैरग्निं परिस्तीर्य, अर्थवदासाद्य, अग्नेरुत्तरतः प्राक्संस्थमुदक्संस्थं वा पात्रासादनम्, पवित्रच्छेदनार्थं दर्भास्त्रयः, पवित्रे द्वे, प्रोक्षणीपात्रम्, आज्यस्थाली, सम्मार्जनकुशास्त्रिप्रभृतयः, उपयमनकुशाः सप्तप्रभृतयः, समिधस्त्रिप्रभृतयः, स्रुवः, आज्यम्, धानाः पूर्णपात्रम् च॥

उपकल्पनीयानि—प्रतिशिष्यं नव नव समिध आर्द्राः सपत्रा औदुम्बरस्य। दधिभक्षणार्थम्। लौकिका धाना बाहुमात्रमौदुम्बरकाष्ठम् तिलस्थापनस्थाने सर्पफणाकारमाकर्षफलकम्[१]। तिलाश्चेति। पवित्रकरणम्। द्वयोरुपरि त्रीणि निधाय द्विमूलेन द्वौ कुशौ प्रदक्षिणीकृत्य सर्वान्युगपद्धृत्वाऽनामिकांगुष्ठाभ्यां छित्वा तान् उत्तरतः प्रक्षिपेत्। प्रोक्षणीपात्रं प्रणीतोत्तरतो निधाय, प्रोक्षणीपात्रे पात्रान्तरेण प्रणीताद्भिस्तासां प्रोक्षणम् सपवित्रहस्तेनोत्तानेन पात्रप्रोक्षणम्। आज्यस्थाल्याः, सम्मार्जनकुशानां, उपयमनकुशानां, समिधां, स्रुवस्य, आज्यस्य, धानानां, पूर्णपात्रस्य प्रोक्षणम्। प्रणीताग्न्योर्मध्ये संचरे प्रोक्षणीं निधाय कुशोपग्रहेण आज्यस्थाल्यामाज्यनिर्वापः। आज्याधिश्रयणम्। ज्वलदुल्मुकेन पर्यग्निकरणम्। इतरथावृत्तिः। अर्धश्रिते स्रुवं प्रतप्य, सम्मार्जनकुशैः संमृज्य, अग्रैर्मूलादारभ्याग्रपर्यन्तं, मूलैरग्रादारभ्य मूलपर्यन्तम् प्रणीतोदकेनाभ्युक्ष्य, पुनः प्रतप्य दक्षिणतो निदध्यात्। आज्यमुद्वास्य उत्तरतो निधाय, ततोऽग्नेः पश्चिमतो निदध्यात् पवित्राभ्यामाज्यमुत्पूय, प्रोक्षणीश्च पूर्ववदुत्पूय, आज्यमवेक्ष्य अपद्रव्यनिरसनम्। उपयमनकुशानादाय, तिष्ठन् समिधोऽभ्याधाय प्रोक्षण्युदकशेषेण सपवित्रेण हस्तेन ईशानम् आरभ्य ईशानपर्यन्तम् प्रदक्षिण-

१—औदुम्बरस्य या शाखा फलकद्वयसंयुता। आकर्षफलकं नाम याज्ञिकैः परिकल्पितम्॥

मग्निं पर्युक्ष्य, इतरथावृत्तिः । पवित्रयोः प्रणीतासु निधानम् । सोपग्रहं सव्यहस्तं उत्तानं हृदि निधाय दक्षिणजानुनिपातः ब्रह्मणोन्वारब्धः। दक्षिणहस्तेन स्रुवेण होमः ॥ मनसा—ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम (त्यागान्ते द्रव्यप्रक्षेपः। प्रोक्षणीपात्रे संस्रवधारणम्) ॐ इन्द्राय स्वाहा इदं इन्द्राय न मम। ॐ अग्नये स्वाहा इदमग्नये न मम। ॐ सोमाय स्वाहा इदं सोमाय न मम॥ १. ऋग्वेदे—सप्तविंशत्याहुतयः[१]। ॐ पृथिव्यै स्वाहा इदं पृथिव्यै न मम। ॐ अग्नये स्वाहा इदमग्नये न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम॥ २. यजुर्वेदे—ॐ अन्तरिक्षाय स्वाहा इदं अन्तरिक्षाय न मम। ॐ वायवे स्वाहा इदं वायवे न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम। ३. सामवेदे—ॐ दिवे स्वाहा इदं दिवे न मम। ॐ सूर्याय स्वाहा इदं सूर्याय न मम। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम॥ ४. अथर्ववेदे दिग्भ्यः स्वाहा इदं दिग्भ्यो न मम। ॐ चन्द्रमसे स्वाहा इदं चन्द्रमसे न मम। ॐ ब्रह्मणे

१—एताः सप्तविंशत्याहुतयः आज्येन ततः प्रोक्षितधानाभिधारणम्। स्रुवेण धाना अवदाय सदसस्पतिमद्भुतमित्यनेन मन्त्रेण जुहुयात्॥

स्वाहा इदं ब्रह्मणे न मम। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यो न मम। ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम। ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम। ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यो न मम। ॐ श्रद्धायै स्वाहा इदं श्रद्धायै न मम। ॐ मेधायै स्वाहा इदं मेधायै न मम ॐ सदसस्पतये स्वाहा इदं सदसस्पतये न मम। ॐ अनुमतये स्वाहा इदं अनुमतये न मम॥ ॐ सदसस्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्यम्। सनिम्मेधामयासिषꣳस्वाहा॥१॥ इदं सदसस्पतये न मम। इमं मन्त्रं गुरुणा पठ्यमानं शिष्या अपि सहानुपठेयुः॥ (ततः उदुम्बर-समित्त्रितयमभिघार्य हस्ते गृहीत्वा उत्थाय प्राङ्मुखस्तिष्ठन्तः।) ॐ तत्सवितुर्वरेण्यम्०। स्वाहा इदमग्नये न मम॥ (इत्युच्चार्य एकां समिधमादध्युः। एवं मन्त्रेण द्वितीयां तथा तृतीयाम्। ततो सर्वे उपविशेयुः। आचार्यः पुनः स्रुवेण धाना अवदाय) द्वितीयां धानाहुतिं पूर्ववत्–ॐ तत्सवितु०। स्वाहा इदमग्नये न मम॥ ततस्तिस्रोऽपराः समिधो घृतेनाऽभ्युक्ष्य। उत्थाय प्राङ्मुखास्तिष्ठन्तः–ॐ तत्सवितुः०। स्वाहा इदमग्नये न मम। (इत्युच्चार्य एकां समिधमादध्युः)। पुनः ॐ तत्सवितु०। स्वाहा इदमग्नये न मम। एवं द्वितीया। पुनः ॐ तत्सवितु०। स्वाहा इदमग्नये न मम। एवं तृतीयां हुत्वाऽऽचार्यो धानाहुतिं

जुहुयात् ॥ ॐ सदसस्पत० । स्वाहा इदं सदसस्पतये न मम ॥ मन्त्रानुपठनम् (शिष्याणामपि—समित्त्रयं पूर्ववत् जुहुयात्) ॐ तत्सवितु० । स्वाहा इदमग्नये न मम । (एवं द्वितीयां तथा तृतीयाम् ब्रह्मचारी तु । शिष्योऽहरहरग्निकार्यक्रमेण समिधादानं कुर्यात् न सावित्र्या । अन्यत्सर्वं समानम्) धानाभक्षणम् (ततो या उपकल्पिता धानास्तिस्रस्तिस्रो गृहीत्वा)—ॐ शन्नोभवन्तुव्वाजिनोहवेषुदेवताता-मितद्द्रवः स्वर्क्काः ॥ जम्भयन्तोहिंव्वृकᳫ रक्षाᳫंसिसनेम्म्यस्म्मद्युयवन्नमीवाः ॥ (इति मन्त्रेण दन्तैरखादन्तः प्राश्नीयुः ॥ ततो द्विराचमनम्) दधिभक्षणम्—ॐ दधिक्काव्णोऽअकारिषञ्जिष्णोरश्वस्यव्वाजिनः । सुरभिनोमुखाकरत्प्रणऽआयुᳫंषितारिषत् ॥ द्विराचमनम्—(ततो आचार्यो यावन्तं शिष्यगणं आत्मन इच्छेत्तावन्तस्तिलान् गणयित्वा आकर्षफलकेनावदाय) ॥ ॐ शुक्रज्ज्योतिश्चचित्र-ज्ज्योतिश्चसत्यज्ज्योतिश्चज्ज्यं तिष्मॉंश्च ॥ शुक्रश्चऽऋतपाश्चात्यᳫ हाः ॥ इत्याद्यनुवाकेन सावित्र्या जुहुयात ॥ ॐ तत्सवितु० । स्वाहा इदं सवित्रे न मम ॥ (संस्रवप्रक्षेपः । ततो धानाभ्यः स्विष्टकृत्) ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम ॥

भूराद्या नवाहुतयः (आज्येन जुहुयात् ॥ सर्वत्र त्यागान्ते द्रव्यप्रक्षेपः) तद्यथा—१. भूः स्वाहा इदमग्नये न

मम ॥२, ॐ भुवः स्वाहा इदं वायवे न मम ॥३, ॐ स्वः स्वाहा इदं सूर्याय न मम । ॐ त्वन्नो ऽअग्नेव्वरुणस्यविद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा । इदमग्नीवरुणाभ्यां न मम ॥ ॐ सत्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोऽअस्याऽउषसोव्युष्टौ । अवयक्ष्वनोव्वरुणᳯ रराणोव्वीहिमृडीकᳯ सुहवोनऽएधि स्वाहा इदमग्नीवरुणाभ्यां न मम ॥ ॐ अयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्वमयाऽअसि । अयानोयज्ञंवहास्ययानोधेहिभेषजᳯ स्वाहा ॥ (सौत्रमन्त्रः) इदमयाय न मम ॥ इदमग्नये अयसे न मम (इति केचित्)। ॐ येतेशतंवरुणं येसहस्रं यज्ञियाःपाशाविततामहान्तः । तेभिर्नोऽअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरुतः स्वर्काः स्वाहा ॥ (सौत्रमन्त्रः) इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ॐ उदुत्तमंव्वरुणपाशमस्मदवाधमंविमद्ध्यमᳬश्रथाय । अथाव्वयमादित्यव्रतेतवानागसोऽअदितये स्याम स्वाहा । इदमादित्यायादितये न मम ॥ (उपांशु) ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम । (संस्रवप्राशनम्) ॥ आचमनम् (पवित्राभ्यां मार्जनम अग्नौ पवित्रप्रतिपत्तिः) ब्रह्मणे पूर्णपात्रदानम्—ब्रह्मन् अस्योपाकर्मणोऽङ्गतया विहितं पूर्णपात्रं प्रति-

गृह्यताम् ॥ ॐ द्यौस्त्वा ददातु पृथिवीत्वा प्रतिगृह्णातु इति मन्त्रस्य ब्रह्मा जपं कुर्यात् ॥ प्रणीता-विमोकः । ततोऽग्नि मुत्तरेण कुशेषु प्रत्यङ्मुखोपविष्टेभ्यः शिष्येभ्यः प्राङ्मुख आचार्य ओङ्कारमुक्त्वा त्रिश्च सावित्रीमनुब्रूयात्)—ॐ तत्सवि० दयात् । इषेत्वादि ईशावास्यान्तम् ॥ व्रतमुपैष्यन्नित्यादि सर्वमन्त्रब्राह्मणयोरध्यायादि प्रब्रूयात् ॥ बह्वृचाम् ऋषिमुखानि । पर्वाणि छन्दोगानाम् । सूक्तान्यथर्वणानाम् ॥ (एवं सर्वं पठित्वा गुरुः शिष्याश्च जपन्ति) ॐ सहनोऽस्तु सहनोऽवतु सहनऽइदं वीर्यवदस्तु ब्रह्म इन्द्रस्तद्वेद येन यथा न विद्विषामहे ॥ (इति मन्त्रं जपित्वा त्रिरात्रमनध्ययनं लोम नखानामनिकृन्तनमवपनं च करिष्यामहे । इति सर्वेषां सङ्कल्पः) प्रागुत्सर्गाद्वा नियमो लोम-नख-निकृन्तनम् । उत्सर्गावधि लोम-नखानामकृन्तनमहं करिष्ये इति ॥ छन्दसामुत्सर्गात्प्राङ्मन्त्रब्राह्मणयोरनध्ययनम् ॥ इति उपाकर्मप्रयोगः ॥

मुद्रक—सागर मुद्रण, के २३।११९—२२१००१